CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क. का. १४

तर्पण-एकोद्दिष्ट-पार्वण-एकपार्वण-तीर्थ-श्राद्ध सहितं पुस्तकम्

~~TANKA~~ PRASAD KHANAL

क. का. १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह. नं. १२२८३

[illegible] आ. आ. [redacted]

...विद्यापीठ
पुस्तकालय

नुधागत: ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकोद्दिष्ट श्राद्धको सामग्री । १५

दियो, बत्ति, दीयो राख्ने चामल, चन्दन, केशरी, अक्षता, फुल, तिल जौ, धूप, घ्यूमा-भिजायेका बत्ति, सुपारी, आसनी, कर्मपात्र, पञ्चपात्र, अर्घ, गाइको दूध, दही, घीउ, मह, चिनी, मालभोगकेरा, नैवेद्य, बारा, खालीपान, लायेको पान, मसाला, वस्त्रसूत्र, ब्राह्मण १, ब्राह्मणथाप्ने चामल, पिण्ड पकाउने चामल, तसला, दाउरा, चुलो, खगौतो, बालुवा, बिष्णुपादुका, कुश, मोटक १७, औंठी २, पवित्र १ जनै जोर ३, सिधाभाग २, दुना, चार्कुने टपारीं, गङ्गाजल, चोखोपानी, भेटी, दक्षिणा, श्राद्धकर्ताले लाउने चोखो धो , उपर्ना, गौदान, तर्पणको सामग्री, ब्राह्मण भोजन शक्नेले शय्यादान, पददान पितृसूक्त पाठ गीता पाठ राम गीतापाठ भागवतपाठ शक्ति अनुसारले गर्नु ।

पार्वण श्राद्धको सामग्री

दीयो, बत्ति, तिलको तेल, तर्पणको सामग्री, दीयोराख्ने चामल, चन्दन, केशरी, अक्षता तिल, जौ, फुल, धूप, घ्यूको बत्ती, फल-फूल, पक्वान्न, नैवेद्य, पानलायेको, मसाला खाली पान, टपरी, बोहोता, दूना २५ चार्कुने कपूर, आसनी, पञ्चपात्र कर्मपात्र २ गाईको दूध, दही, घिउ, मह, चिनी, मालभोगकेरा, सुपारी, जनै जोर ५ वस्त्र सूत्र ब्राह्मण ४ कुश, मोटक प्रशस्त, पवित्र ८ ब्राह्मणथाप्ने चामल चारकुने ४ औंठी ३, पिण्ड पकाउने चामल,

गा.क्र. १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाउरा कसौंडो, चुल्हो, अर्घ, खगौतो बालुवा, विष्णुपादुका, सिधाभाग (सक्नेले ९ नसक्नेले ५), गङ्गाजल, चोखो पानी, श्राद्ध कर्त्ताले लाउने धोती, उपर्ना, जनै, गोदान, भेटी दक्षिणा, मासका फुरौला, ब्राह्मण भोजन, शक्नेले शय्यादान, पितृसूक्तपाठ, भागवत पाठ, गीता पाठ, (अन्न सङ्कल्प श्राद्धमा पिण्ड बाहेक अरु सबै सामग्री पार्वणबमोजीम एकापार्वणमा पनि गर्नु) ॥

स्त्रीले गर्ने पार्वण श्राद्धमा विशेष सामान ।

ब्राह्मणथाप्ने चामल चार्कुने ६, ब्राह्मण ६ पवित्र १२, जनै जोर ७, सिधाभाग ९, बाँकी सामग्री पार्वण बमोजीम जान्नु—॥ मातृनवमीमा विशेष सामग्री—

ब्राह्मणथाप्ने चामल चार्कुने ६, ब्राह्मण ६, पवित्र १२, जनै जोर ७, सिधाभाग ७, पिण्ड ९, बाँकी सामग्री पार्वण बमोजीम जान्नु

श्रीगणेशाय नमः । अथ श्राद्धनिर्णयः किञ्चिद् उच्यते । स्वकर्मयोगान्नानायोनिगता अपि पितरः पुत्रादिभिर्दत्तं पिण्डादिकमग्निष्वात्तादि पितृद्वारा लभन्ते तदुक्तं निर्णयसिन्धौ-नामगोत्र पितृणान्तु प्रापकं हव्यकव्ययो ॥ अग्निष्वात्तादयस्तेषामाधिपत्ये व्यवस्थिताः ॥ १ ॥ नाममन्त्रा स्तदादेशा भवान्तरगतानपि ॥ प्राणिनः प्रीणयन्त्येव तदाहारत्वमागतान् ॥ २ ॥ देवो वा यदिवा जातः शुभकर्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्राणिनः प्रीणयन्त्येव ... ॥ २ ॥ देवो वा यदि वा जातः शुभकर्मा-
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नुयोगतः ॥ तस्यान्नममृत्तं भूत्वा देवत्वेऽप्यनुगच्छति ॥ ३ ॥ गान्धर्वं भोगरूपेण पशुत्वे च तृणं भवेत् । श्राद्धान्नं वायुरूपेण नागत्वेऽप्युपतिष्ठते ॥ ४ ॥ पानं भवति यक्षत्वे राक्षसत्वे तथामिषम् ॥ दनुजत्वे तथा मद्यं प्रेतत्वे रुधिरोदकम् ॥ ५ ॥ मनुष्यत्वेऽन्नपानादि नानाभोगकरं भवेदिति*श्राद्धन्नाम–मृतोद्देश्यको विप्रस्वीकाराङ्गको द्रव्यत्यागः'' इति श्राद्धमयूखे । अदनीयस्यतत्स्थानीयस्य वा द्रव्यस्य श्रद्धयात्यागः ॥ इति मिताक्षरायाम्, वेदबोधितपात्रालम्भनपूर्वक प्रमीत-पित्रादिदेवतोद्देश्यको द्रव्यत्यागो विशेषः श्राद्धमिति तद्विवेककाराः ॥

श्राद्धाधिकारिणः ।

श्राद्धमयूखे—पितुः पुत्रेण कर्तव्या पिण्डदानोदकक्रिया ॥ प्रजाभावेतु पत्नी-स्यात्पत्न्यभावे तु सोदरः । अत्र पुत्रग्रहणं पौत्रप्रपौत्रयोरुपलक्षणम् ॥

यथाह विष्णुः—पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसन्ततिः ॥ सपिण्डसन्ततिर्वापि श्राद्धार्हा नृप जायते' इति ॥

---

* वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ॥ प्रीणयन्तिमनुष्याणां पितॄन् श्राद्धेन तर्पिताः । आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः ॥ (पितामहा वस्वादय इत्यर्थः) इति याज्ञवल्क्यवचनेन स्वकल्याणमभीप्सुभिः पुत्रादिभिः पित्रादिश्राद्धं कर्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुः—पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः' इति अत्र पुत्रप्रतिनिधि-शब्देन दत्ताकादयो गृहन्ते क्रियालोपात् क्रियालोपभयादित्यर्थः ॥

श्राद्धदेशाः मनुः—शुचिदेशं विविक्तं तु गोमयेनोपलेपयेत् ! दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् ॥ पृथ्वीचन्द्रोदये विष्णुधर्मेदक्षिणाप्रवणे देशे तीर्थादो च गृहेऽपि वा । भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्नतः ॥

स्कन्द पुराणे—तुलसीकाननच्छाया यत्र यत्र भवेद्द्विज ॥ तत्र श्राद्धं प्रदातव्यं पितृणां तृप्तिहेतवे' इत्युक्तम् ॥ (श्राद्धकालाः—पूर्वाह्णे मातृकं श्राद्ध-मपराह्णेतु पैतृकम् ॥ एकोद्दिष्टन्तु मध्यांह्ने प्रातर्वृद्धिनिमित्तकमिति ॥

एकोद्दिष्टं नाम—एकपुरुषोद्देशेन क्रियमाणं श्राद्धम्, त्रिपुरुषोद्देशेन क्रिय-माणं श्राद्धं पार्वणम् इति मिताक्षरायाम् । श्राद्धमयूखेऽपिएकमुद्दिश्य यच्छ्राद्धमेको-द्दिष्टं प्रचक्षते ॥ त्रीनुद्दिश्यतुयत्तात्द्धिपार्वणं मुनयो विदुरिति ॥

अन्यान्यपि श्राद्धानि बहुधा प्रतिपादितानि सन्ति ग्रन्थेषु नात्र प्रपञ्च्यन्ते तानि विस्तारभयात् ॥ श्राद्धेनिषिद्धस्थानविषये, निर्णयसिन्धौ शङ्खवचनम् । गोगजाश्वादिजुष्टेषु कृत्रिमायां तथा भुवि ॥ न कुर्याच्छाद्धमेतेषु पारक्यासु च भूमिषु, इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भूमिषु, इति म CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रैव यमः—परकीयगृहे यस्तु स्वान् पितृन् तर्पयेद्यदि ॥ तद्भूमिस्वामिपितृभिः श्राद्धकर्म विहन्यते । ब्राह्मभारतयोरपि–परकीयगृहे यस्तु स्वान् पितृन् तर्पयेद्यदि ॥ तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलात् । अग्रभागं ततस्तेभ्यो दद्यान्मूल्यं च जीवितमिति–श्राद्धे वर्ज्यविप्रमाह भारते–कितवो ब्रह्महा यक्ष्मी पशुपालो निराकृतिः । ग्रामप्रेष्यो वार्धुसिको गायकः सर्वविक्रयी, इति । पुरूरवा माद्रवाश्च पार्वणे समुदाहृतौ ॥ न ब्राह्मणं परीक्षेत दैवेकर्मणि धर्मवित् ॥ पित्र्ये-कर्मणि तु प्राप्ते परीक्षेत प्रयत्नः–इति मनुवचनात्पित्र्ये कर्मणि ब्राह्मणः परीक्षणीयः । तत्रैव—उत्पत्तिर्नाम चैतेषां नविदुर्ये द्विजातयः । अयमुच्चारणीय स्तैः श्लोकः श्रद्धासमन्वितैः । स यथा–आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ॥ ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते मनुः–यत्नेन भोजयेच्छ्राद्धे ब्राह्मणं वेदपारगम् । शाखान्तगमथाध्वर्यंछन्दोगं वा समाप्तिगम् ॥ येषामन्यतमो यस्य भुञ्जीत श्राद्धमर्चितः ।। पितृणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी ॥

बृहत्पराशरसंहितायाम्—ब्राह्मणं न सगोत्रं च पूजयेत्पितृकर्मणि ॥ नोपतिष्ठन्ति तत्तेषां किन्तु स्याच्च निराशता ॥ ११ ॥ स्वगोत्रं भोजयेद्यस्तु पितृश्राद्धेषु वै द्विजः ॥ हताः स्युः पितरस्तेन न भुक्तमुपतिष्ठते ॥ १२ ॥ श्राद्धं कुर्वन् द्विजोऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानात् स्वगोत्रं यस्तु भोजयेत् ॥ सलुप्तपितृदेवः सन् नरकं प्रतिद्यते ॥ १३ ॥ तस्मान्न गोत्रिणं विप्रं भोजयेद्विधिपूर्वकम् ॥ ज्ञातिमत्वेन भोज्यास्ते उत्थितैस्तु द्विजोत्तमः ॥ १४ ॥ इति ॥

ब्राह्मणनिमन्त्रणविषये मनुः-पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते ॥ निमन्त्रयेत त्र्यवरान् सम्यक् विप्रान्यथोदितान् । तत्रैव निमन्त्रितब्राह्मणस्य नियमः—निमन्त्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा ॥ न च छन्दांस्यधीयीत यस्य श्राद्धं च तत्भवेत् ॥ निमन्त्रिताह्नि पितर उपतिष्ठन्ति तान् द्विजान् ॥ वायुवच्चानुगच्छन्ति तथाऽसीनानुपासते" इत्याह ॥

श्राद्धे निमन्त्रितब्राह्मणत्यागे अपरार्के यमः—केतनं कारयित्वा तु योऽतिपातयति द्विजम् ॥ ब्रह्महत्यामवाप्नोति शूद्र योनौ च जायते ॥ आमन्त्र्य ब्राह्मणं यस्तु यथा न्यायं न पूजयेत् ॥ अतिकृच्छ्रासु घोरासु तिर्यग्योनिषु जायते ॥ प्रमादात्त्यागे हारीतः—प्रमादाद्विस्मृतं ज्ञात्वा प्रसाद्यैनं प्रयत्नतः ॥ तर्पयित्वा यथान्यायं सर्वं तत्फलमश्नुते; इति यमः-आमन्त्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति ॥ नरकाणां शतं गत्वा चाण्डालेश्वभिजायते इति—

श्राद्धे पिण्डप्रमाणमाह श्राद्धमयूखे अङ्गिराः—कपित्थविल्वमात्रान् वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्राद्धे पिण्डप्रमाणमाह श्राद्धमयूखे अङ्गिराः—कपित्थविल्वमात्रान् वा

पिण्डान्दद्यात्समाहितः ॥ कुक्कुटाण्डप्रमाणान् वा यदिवाऽऽमलकैः क्रमात् ॥ वदरेण समान्वापि दद्याच्छ्रद्धासमन्वितः, इति ॥ येषां च शक्तिभेदेन व्यवस्था ॥

व्राह्मणसंख्या याज्ञवल्क्ये-द्वौ दैवेप्राक् त्रयः पित्र्ये उदगेकैकमेव वा, इति ७
व्यवस्थायुक्तानिपरिमाणान्याह मरीचि—आर्द्रामलकमात्रन्तु पिण्डान् कुर्वीत पार्वणे ॥ एकोद्दिष्टे विल्वमात्रं पिण्डमेकं तु कारयेत् ॥ नवश्राद्धे स्थूलतरं तस्मादपि तु निर्वपेत् ॥ तस्मादपि-स्थूलतरमाशौचे प्रतिवासरम् ॥ अन्त्येष्टिपद्धतौ भट्टास्तु—एकोद्दिष्टे सपिण्डे तु कपित्थन्तु विधीयते ॥ नारिकेलप्रमाणन्तु प्रत्यब्दे मासिके तथा ॥ तीर्थे दर्शे च सम्प्राप्ते कुक्कुटाण्डप्रमाणतः ॥ महालये गयाश्राद्धे कुर्यादामलकोपमम्, इत्याहुः । अत्र यथाचारं व्यवस्था ।

अथ पाकविचारः, धर्मसिन्धौ—श्राद्धकर्त्रा पाकः स्वयमेव कार्यः ॥ तदभावे शुद्धपत्न्या तदभावेतु बान्धवः ॥ सगोत्रैर्वा सपिण्डैर्वा मित्रैर्वा सुगुणान्वितैः ॥ श्राद्धपाके निषिद्धस्त्रियः, पृथ्वीचन्द्रोदये व्राह्मे—रजस्वलां च पाखण्डां पुंश्चलीं पतितां तथा ॥ त्यजेच्छूद्रां तथा बन्ध्यां विधवां चान्यगोत्रजामिति ॥ तत्रैव पाकभाण्डबिचारः । पाकभाण्डानि सौवर्णरौप्यताम्रोद्भवानि च ॥ कांश्यानि मृण्मयं दृढदंतं त्वयमेव मनीषिभिः । पैत्तलं रङ्गजातं तुविहितं च नतुनिन्दितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नकदाचित्पचेदन्नमयः स्थालीषु पैतृकम् ॥ अयसो दर्शनादेव पितरो विद्रवन्ति हि ॥ फलशाकादिछेदनार्थभिन्नानामायसानां शस्त्राणां भाण्डानां च दर्शनमपि पाकादिस्थाने निषिद्धम् ।

श्वश्रृगालखरैः स्पृष्टः पिण्डो भिन्नः प्रमादतः । कर्तुरायुष्यनाशः स्यात्प्रेतस्तं नोपसर्पति ॥ तद्दोषपरिहारार्थं प्राजापत्यं प्रकल्पयेत् ॥ पिण्डोपघाते धर्मसिन्धौ श्वश्रृगालखरैः स्पृष्टः पिंडो भिन्नः प्रमादतः मार्जारमूषकैः स्पृष्टश्चंडालपतितादिभिः ॥ प्रजापत्यं चरेत् स्नात्वा पुनः पिंडान्यथाबिधिः ॥ पाकान्तरेण तेन पाकेन वा पिंडदानमात्रं पुनः कार्यं न सर्वं श्राद्धावृत्तिरिति सर्वसम्मतमिति ॥ केतकीं तुलसीपत्रं बिल्वपत्रं च बर्जयेत् ॥ द्रोणं च करवीरं च धतूरं किंशुकं तथेति पृथ्वीचन्द्रोदयवचनाद्यद्यपि तुलसी न प्राप्ता तथाऽपि—तुलसीगन्धमाघ्राय पितर स्तुष्टमानसाः ॥ प्रयान्ति गरुडारूढास्तत्पदं चक्रपाणिनः, इति पारिजात वचनात्पिण्डेषु निवेदनं भवति नतु ब्राह्मणार्चनेषु इति विशेषः ॥

अक्षय्यासनयोः षष्ठी द्वितीया वाहने तथा ॥ अन्नदाने चतुर्थी स्याच्छेषाः सम्बुद्धयः स्मृताः ॥ गृह्याग्निशिशुदेवानां ब्रह्मचारीतपस्विनाम् ॥ तावन्न दीयते किञ्चिद्यावत्पिण्डान्न निर्वपेत्, इति हेमाद्रिः ॥ सम्बन्धः प्रथमं ब्रूयाद् गोत्रं नाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

किञ्चिद्यावत्पिण्डान्न निर्वपेत्, इति हेमाद्रि । ... प्रथमं ब्रूयाद् गोत्रं नाम
CC-0. In Public Domain. Digitization by eGangotri. Funding: MHRD

तथैव च ॥ पश्चाद्रूप विजानीयात् क्रम एष सनातनः ॥ सकारेण तु वक्तव्यं गोत्रं सर्वत्र धीमता ॥ सकारः कृतपो ज्ञेय स्तस्माद्यत्नेन तं वदेत् ॥ मध्याह्नं खड्गपात्रं च तथा नेपालकम्बलः ॥ रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः ❀ ॥ पार्वणोऽपराह्ले इति मात्स्योक्तेः एते श्राद्धेप्रशस्ताः ।

निर्णयशिन्धौ—श्राद्धारम्भेऽवसाने च पादशोचार्चनान्तयोः ॥ विकिरे पिण्ड-दाने च षट्स्वाचमनमिष्यते, इति । तत्रैव—आदौ विप्राङ्घ्रि शौचान्तेऽभ्यर्चने विकिरे कृते ॥ पिण्डानप्यर्चयित्वा च विसर्ज्यान् ब्राह्मणांस्तथा ॥ आचामेच्छ्राद्ध-कर्ता च स्थानेष्वेतेषु सप्तसु ॥ आद्यन्तयो द्विराचामेच्छेशेषु तु सकृत्सकृदिति ॥ पृथ्वीचन्द्रोदये पराशरः—सर्वदा च तिलाग्राह्याः पितृकृत्ये विशेषतः ॥ भोज्यपात्रे तिलान् दृष्ट्वा । निराशाः पितरो गता इति ॥ शंखः—यत्किञ्चित्पच्यते गेहे भक्ष्यभोज्यमगर्हितम् ॥ अनिवेद्य न भोक्तव्यं पिण्डमूले कथञ्चन, इति ।

जमदग्निः—सूक्त स्तोत्रजपं त्यक्त्वा पिण्डाघ्राणं च दक्षिणाम् ॥ आह्वानं स्वागतं चार्घ्यं विना च परिवेषणम् ॥ विसर्जनं सौमनस्यमाशिषं प्रार्थनं तथा ॥ विप्रप्रदक्षिणां चैव स्वस्तिवाचनकं तथा ॥ पितॄनुद्दिश्य कर्तव्यं प्राचीनावीत्तिना

❀ पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः । अष्टावेते यतस्तस्मात् कुतपा इति विश्रुताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदा इति ॥ पृथ्वीचन्द्रोदये. यमः-पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् ॥ सन्ध्यां प्रतिग्रहं होमं श्राद्धभोक्ताष्टवर्जयेत् ॥ सन्ध्यानिषेधोहि प्रायश्चित्तात्पूर्वः ज्ञेयः । यथाहोशनाः—दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ततः सन्ध्यामुपासीत जपेच्च जुहुयादपि, इत्याह ॥ १०

पिण्डदाने पित्रादिनामाज्ञाने त्वपस्तम्बः—यदि नामानि पितॄणां न विद्यात्स्वधा पितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिडं दद्यात्, स्वधा पितृभ्योऽन्तरिक्ष-सद्भ्य इति द्वितीयम् स्वधापितृभ्यो दिविषद्भ्यः इति तृतीयम् एवं मातामहेषु मातृषु च बोध्यम् इति ।

श्राद्धेपाकार्थतण्डुलस्य सकृत्प्रक्षालनमाह गोभिलः—त्रिःफलीकृतांस्तण्डुलान् त्रिर्देवेभ्यः प्रक्षालयति द्विर्मनुष्येभ्यः सकृत् इति श्राद्धतत्वे ॥

ऊर्ध्वपुण्ड्रं वा चन्द्राकारमथापिवा ॥ श्राद्धकर्ता न कुर्वीत यावत्पिन्डान्न-निर्वपेत्, इति विश्वप्रकाशे ॥

क्वचिदूर्ध्वपुण्ड्रविधिः—श्राद्धभोक्तृपरतया व्याख्यातः पृथ्वीचन्द्रेण । अन्ये तु, ऊर्ध्वपुण्ड्रं द्विजातीनामग्निहोत्रसमो विधिः । श्राद्ध काले तु सम्प्राप्ते कर्ता भोक्ता च तत्त्यजेत ॥ ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः, इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

भक्तो च तत्त्यजेत ॥ ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः इति ॥

अथ श्राद्धपूर्वदिनकृत्यम् । वस्त्रशौचादि कर्तव्यं श्वः कर्तास्मीति जानता ॥ स्थानोपलेपनं कृत्वा ततो बिप्रान्निमन्त्रयेत् ॥ दन्तकाष्ठं च विसृजेद् ब्रह्मचारी शुचिर्भवेत् ॥ श्राद्धमयूखे देवलः—उपलिप्ते शुचौ देशे स्थानं कुर्वीत सैकतम् ॥ मण्डलं चतुरस्त्रं वा दक्षिणावनतं महत् ।

हस्तमात्रा तथा भूमेश्चतुरङ्गुलमुच्छ्रिता ॥ पिण्डस्य यापणार्थाय रमणीया विशेषतः ॥ कार्या वेदो यथाविधि इति शेषः ।

षट्त्रिंशन्मते—सव्यं जानु निपात्यैव भूमौ पिण्डान्प्रयत्नतः ॥ निर्वपेत्पितृतीर्थेन स्वधाकारमुदाहरन् ॥ उत्तानेन तु हस्तेन निर्वपेद्दक्षिणामुखः, इति ब्रह्माण्डपुराणे ॥

श्राद्धीय दक्षिणादाने विशेषमाह पारस्करः–हिरण्यं विश्वेभ्यो देवेभ्यः । रजतं पितृभ्यः इति ॥ पिण्डक्षेपस्थलमाह याज्ञवल्क्यःपिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ-जलेऽपिवेति ॥

नबम्यामन्वष्टकाश्राद्धम् तत्र कात्यायनः—अन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम् । पित्रादि मातृमध्यं च ततो मातामहान्तकम् ॥

पृथ्वीचन्द्रोदये ब्रह्माण्डे— पितृणां प्रथमं दद्यात् मातृणां तदनन्तरम् ॥ ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातामहान्तं च अन्वष्टक्यः क्रमः स्मृतः इति । मैत्रायणीयपरिशिष्टे...आन्वष्टक्यं गयाप्राप्तौ सत्यां यच्चमृतेऽहनि । मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति ।

अथ चतुर्दशी पौर्णमासीमृतस्य महालयनिर्णयः—चतुर्दश्यां मृतस्यापिमहा- १२
लयश्चतुर्दश्यां न भवति ।। श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां प्रकीर्तितम्, इति नियमेन सर्वतो बलिष्ठेन प्रतिवार्षिकश्राद्धातिरिक्तश्राद्धस्य चतुर्दश्यां निषेधात्, एवं पौर्णमास्यां मृतस्यापि महालयः पौर्णमास्यां न कार्यः—अपरपक्षत्वाभावेन तस्यां महालयाप्राप्तेः तेन चतुर्दशी मृतस्य पौर्णामासीमृतस्य वा महालयो द्वादश्यमावस्यादितिथिषु कार्यं, इति धर्मसिन्धुः । एकस्मिन्नेवदिने श्राद्धसम्पाते निर्णयः—एकत्रैव दिने श्राद्ध द्वयं प्राप्तं यदा तदा । चरेदेव पुरावर्षात् पितुर्मातुश्च यत्सुतः ।। एकस्मिन् यः करोत्यह्नि द्वयोः श्राद्धं यदा द्विजः ।। तदा पूर्वमृतस्यादौ कृत्वा स्नात्वा यथाविधि ।। पश्चात्पश्चान्मृतस्यैव पृथक् पाकौ समाचरेत् ।। नकस्मिन्दिवसे श्राद्धं त्रयाणां कुचित्रत् द्विजः ।। एकः कुर्यात् तथा प्राप्ते अन्यो भ्राता समाचरेत् ।। भ्रातर्यविद्यामाने तु तत् परेह्नि समाचरेत् ।। अन्यथा श्राद्धहन्ता स्याच्छ्राद्धसङ्करकृद्भवेत्, इत्याश्वलायनोक्तेरिति पृथ्वीचन्द्रः ।। एकोदिष्टं परित्यज्य पार्वणं कुरुते नरः ।। अकृतन्तद्विजानीयात्सभवेत्पितृघातकः—इति व्यासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नरः ॥ अकृतन्तद्विजानीयात्सभवेत्पितृघातकः—इति व्यासः ।
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ श्राद्धान्तराये क्षयाहाज्ञाने निर्णयः—

मरीचिः—श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि ॥ एकादश्यान्तु कर्तव्यं कृष्णपक्षे विशेषतः, विशेषत इत्युक्तेः शुक्लैकादश्यामपि । वृहस्पतिः—न ज्ञायते मृताहश्चेत्प्रमीते प्रोषिते सति ॥ मासश्चेत्प्रतिविज्ञातस्तद्दर्शे स्यादथाब्दिकम् ॥ दिनमासौ नविज्ञातौ मरणस्य यदा पुनः ॥ प्रस्थानमासदिवसौ ग्राह्यौ पूर्वोक्तया दिशा ॥ मदनरत्ने भविष्ये—मृताहं यो न जानाति मानवो विनतात्मज ॥ तेन कार्यममावस्यां श्राद्धं सांम्बत्सरं सदा । दिनमेव तु जानाति मासं नैव तु यो नरः ॥ मार्गशीर्षे तथा भाद्रे माघे वा तद्दिनं भवेत् ॥ निर्णयामृते तु—यदा मासो न ज्ञित्तो विज्ञातं दिनमे तु ॥ तदा चाषाढके मासि माघे वा तद्दिनं भवेत् ॥

दर्शे क्षयाहे सम्प्राप्ते कथं कुर्वन्ति याज्ञकाः ! आदौ क्षयाहं निर्वृत्य पश्चाद्दर्शो विधीयते इति स्मृतिसारे ॥ विप्रस्य निमन्त्रणोत्तरं सूतके मृतके चाशौचाभावः । निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि ॥ निमन्त्रणाद्धिविप्रस्य स्वाध्यायादिरतस्य च ॥ देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित्, इति ब्राह्मोक्तेः । कर्तुस्तु विष्णुराह-व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ॥ आरब्धे सूतकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नस्यादनारब्धेतु सूतकम्, इति। श्राद्धे प्रारम्भस्तेनैवोक्तः। प्रारम्भोवरणं यज्ञं सङ्कल्पो व्रतसत्रयोः ॥ नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया, इति ॥

आब्दिकं रजोदर्शनेऽपि तद्दिन एव कार्यम्। पुष्पवत्स्वपि दारेषु विदेशस्थोप्य-
नग्निकः। अन्नेनैवाब्दिकंकुर्याद्धेम्नावाऽऽमेन न क्वचित्, इति ॥ माधवीये लौगाक्षिः, मरीचिरपि---अनग्निकः प्रवासी च यस्य भार्या रजस्वला ॥ आमश्राद्धं प्रकुर्वीत न तत्कूर्यान्मृतेऽहनि ॥ कार्ष्णाजिनिः-आपन्नोप्याब्दिकं नैव कुर्यादामेन कुत्रचित् ॥ अन्नेन तदभायां वा कृष्णे वा। हरिवासरे ॥ प्रयोगपारिजाते--रजस्वलायां भार्यायां क्षयाहं यः परित्यजेत् ॥ सवै नरकमाप्नोति यावदाभूतसंप्लवम्। मासिकानिसपिण्डं च अमावास्यां तथाब्दिकम्॥ अन्नेनैवतु कर्तव्यं यस्य भार्या रजस्वला ॥ वस्तुतस्तु। पाकाभावे द्विजातीनामामश्राद्धं विधीयतै इति सुमन्तूक्त्यापाककर्त्रान्तरसत्वेऽन्नेन, अन्यथा आमेनेति व्यवस्था। मारीचिः-आब्दिके समनुप्राप्ते यस्य भार्या रजस्वला ॥ पञ्चमेहनि तच्छ्राद्ध न तत्कुर्यान्मृतेऽहनि ॥ माधवीये-श्राद्धं तदा न कर्तव्यं पंचेमेहनि इत्युत्तरार्द्धं तदपुत्रकर्तृक श्राद्धपरतया व्याख्यातम्। पुत्रकर्तृकश्राद्धे तु तद्दिन एव कर्तव्यता सिध्यति। कुतः-अपुत्रातु यदा भार्या सम्प्राप्ते भर्तुराब्दिके। रजस्वला भवेत्सातु कुर्यात्तत्पंचमेऽहनि इति श्लोकगौतमोक्ते, दैवे कर्मणि पित्र्ये वा पंचमेहनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भवेत्सातु कुर्यात्तत्पंचमेऽहनि इति श्लोकगौतमोक्ते ... वा पंचमेहनि

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

शुध्यति इति प्रभासखण्डाच्च, सप्ताहात्पितृदेवानां भवेद्योग्या व्रतार्चने इति वचनात्तयाऽपि सप्तमेऽहन्येव आब्दिकं कर्तव्यं नतु पंचमेहनि इत्यस्मत्सम्प्रदायः ॥

अन्वष्टकासु बृद्धौ च गयायां च क्षयेऽहनि ॥ अत्र मातुः पृथक् श्राद्धमन्यत्र
पतिना सह । इतिकात्यायनोक्त्या-तत्रैव, स्वेन भर्त्रा समं श्राद्धं माता भुङ्क्ते सुधा समम् । पितामही च स्वेनैव तथैव प्रपितामही इत्युक्तेश्च एतेषु श्राद्धेषु स्त्रीणां पृथक् श्राद्धं भवति नान्यत्र ।

अथ पार्वणश्राद्धोपयोगी किञ्चिल्लिख्यते ॥

भाद्रशुक्लपौर्णमास्यां प्रपितामहात्परांस्त्रीनुद्दिश्य श्राद्धं कर्तव्यम् । नान्दीमुखानां प्रत्यब्दं कन्याराशिमते रवौ ॥ पौर्णमास्यान्तु कर्त्तव्यवाराह वचनं त्येति हेकाद्रिव चनात् पौर्णमासीषु सर्वासु निषिद्धं पिन्डपातनम् ॥ वर्जयित्वा प्रौष्ठपदीं यथा दर्श स्तथैव स इतिगार्ग्यवचनात् । कन्यागते सवितरि यान्यहानितु षोडश ॥ ऋतुभिस्तानि तुल्यानि देवो नारयणोऽब्रवीत् इति ब्रह्माण्डवचनात् ॥ यः कन्यकान्वितः पक्षः सोऽत्यन्तं पुण्यमुच्यते इति कात्यायनवचनात् ॥ मध्ये वा यदिवाप्यन्ते यत्र कन्यां व्रजेविः ॥ सपक्षः सकलः श्रेष्ठः श्राद्धषोडशकं प्रति इति वृद्धमनुवचनाच्च षोडशदिनानि श्राद्धकालः पार्वणे षोडशत्व भाद्रपुर्णिमायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहेत्येकः पक्षः। आश्विनकृष्णप्रतिपदेति द्वितीयाः तिथिवृद्ध्यातृतीयः नाद्यः पूर्णिमायां प्रपितामहात्परानुद्दिश्य नन्दीश्राद्धविधानेन तस्याः पितृश्राद्धे नाङ्गत्व-मिति, नान्त्योऽपि, यत्र पक्षे द्वि तिथ्योर्वृद्धिस्तत्र सप्तदशदिनप्रसङ्गेन एकस्मिन् श्राद्धानापत्तः। न च प्रतिपदा षोडशत्वे तिथिवृद्धौ षोडशत्वहानिः वृद्धे तस्मिन्न-हन्येवान्तर्भावात्। नचैतद्भवतः सम्भवति। तिथिवृद्धचषोडशत्वमितिव्याख्यानात्। अवशिष्यते द्वितीयः पक्षः। अहः षोडशकं यत्तु शुक्लप्रतिपदा सहेति देवलवचनात्। आषाढीमवधिं कृत्वा पञ्चमं पक्षमाश्रिताः॥ काङ्क्षन्ति पितरः क्लिष्टाअन्नमप्यन्वहं जलमिति मनुवनाच्च, अत एव पोर्णमास्यां श्राद्धं न तदङ्गमिति पूर्वोक्तमपि संगतं भवतीतिदिक्॥ विधवा पार्वणश्राद्धं ब्राह्मणद्वारा कुर्यात्॥ विधवा कारयेच्छ्राद्धं-यथाकालमतन्द्रितेतिस्मृतिसङ्ग्रहवचदात्स्वयं सङ्कल्प्य ब्राह्मणद्वारा कारयेत्* श्राध्दं पार्वणमिति प्रयोगपारिजातस्यार्थिकवचनाच्च॥ महालयश्राद्धस्य षोडशदिनेकरणा-सम्भवे कार्तिकदर्शे कार्यम्॥ येयं दीपान्विता राजन् ख्याता पञ्जदशी तिथिः। तस्यां दद्यान्नदत्तञ्चेत्पितृभ्यो वै महालये, इति भविष्यवचनात् तत्राप्यसम्भवे वृश्चिकसङ्क्रान्तेः प्रागेव कर्तव्यम् प्रमाणकरेद्रष्टव्यम्॥ इति श्राद्धनिर्णयः॥ १६

* विधवायास्तु विशेषः स्मृतिसंग्रहे—चत्वारः पार्वणाः प्रोक्ता विधवायाः सदैवहि॥ स्वभर्तृश्वसुरादीनां मातापितातथैव च॥ ततो मातामहानां च श्राद्धदानमुपक्रमेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रादीनां मातापितातथैव च ।। ततो मातामहानां च श्राद्धदानमुपक्रमेत् ।। ... सदैवहि ।। स्वभर्तृश्वसु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशाय नमः ।। तर्पणविषये—आह्निके व्यासवचनम्-एकैकमञ्जलिं देवा द्वौद्वौ तु सनकादयः ।। अर्हन्ति पितरस्त्रीन्त्रीन् स्त्रिय एकैकमञ्जलिम् । मातृमुख्यास्तु यास्तिस्रस्तासां त्रीन् त्रीन् जलाञ्जलीन् ।। सपत्न्याचार्यपत्नीनां द्वौ द्वौ दद्याज्जलाञ्जली इति ।

दक्षिणं बाहुमुद्धृत्य वामकन्धे निवेशितम् । यज्ञोपवीतिमित्युक्तं देवकार्येषु शस्यते ।। कण्ठावलम्बितं चैव ब्रह्मसूत्रं सदा भवेत् ।। तन्निवीतिमितिख्यातं शतं कर्मणि मानुषे ।। उत्क्षिप्ते वामबाहौ तु दक्षिणस्कन्धमाश्रितम् ।। प्राचीनावीतिमित्युक्तं तत्पित्र्येष्वेव कर्मसु इति ।। पात्राद्वाजलमादाय शुभे पात्रान्तरे क्षिपेत् ।। जलपूर्णेऽथवा गर्ते न स्थले तु विबर्हिषि इत्याह्निके हारीतवचनम् । कौर्मे-अपसव्यं ततः कृत्वा पितॄणां दक्षिणामुख । आवाहनं ततः कुर्यादुशन्तस्त्वेत्वृचाः बुधः । आवाह्य तदनुज्ञातो जपेदायन्तुनस्तत इति ।।

अथतर्पणम्—शुद्धासने उपविश्य आचम्य प्रणानायस्य पवित्रेस्थ इतिमन्त्रेण दक्षिणहस्तस्याऽनामिकायां कुशपवित्रधारणम् ; अथ सङ्कल्पः कुशयवतितजलान्यादाय हरिः ॐ ३ तत्सत् ३ ॐ तत्सत् ॐ तत्सत् विष्णुर्विष्णुर्विष्णुः ३ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकल जगत्सृष्टिकारिणो ब्रह्मणो द्वितोय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे भारतखण्डे जम्बूद्वीपे आर्यावर्तान्तर्गते अमुकनद्या अमुककोणे अमुकक्षेत्रे पुण्यभूमौ विक्रमशके बौद्धावतारे षष्ठि सम्वत्सराणां मध्ये अमुकनाम्नि सम्वत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकवासरान्वितायाममुकपुण्यतिथौ अमुकराशिस्थिते श्रीसूर्ये अमुक राशिस्थिते चन्द्रमसि अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथा स्थानस्थितेषु सत्सु एवं ग्रहगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोत्पन्नोऽमुकप्रवरो माध्यन्दिनीयशाखान्तर्गतशुक्लयजुर्वेदाध्यायी अमुकशर्माऽहं ममामुकगोत्रस्य अमुकप्रवरस्य अस्मत्पितुरमुकशर्मणः (अमुकश्राद्धाङ्गत्वेन) नित्यतर्पणाङ्गत्वेन वा श्रीमत्परमेश्वरप्रीतये देवर्षीणां मनुष्याणां दिव्यपितॄणां स्वपितॄणाञ्च तर्पणमहङ्करिष्ये इति संङ्कल्पं कुर्यात् । ताम्रपात्रे रौप्यपात्रे वा प्रथमं गन्धाक्षतपुष्पतुलसीदलादीनि प्रक्षिप्य मन्त्रेण जलं पूरयित्वा तत् पात्रोऽपरि हस्त-प्रमाणान् प्रादेशमात्रप्रमाणान्वा त्रीन् कुशान्प्रागग्रान् स्थापयित्वा तज्जलेन दर्भपुष्पा-परिस्थापिततर्पणजलाधारताम्रपात्रमध्ये गन्धपुष्पादिना विश्वेदेवादीनावाह्यतर्पयेदि-तिक्रमः तथाहि—उपवीती प्राङ्मुखः कुशपाणि देवतीर्थवर्तिना सकुशोदकेन ॐ विश्वान् देवानावाहयिष्ये ॐ आवाहय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐविश्वेदेवासऽआगतश्शृणुताम ऽइम ँ३हवम् ॥ एदम्बर्हिन्निषीदत ॥
ॐव्विश्वेदेवाःश्शृणुतेम ँ३हवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्नि-
जिह्वाऽउतवा यजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् ॥ १९

इतिमन्त्रद्वयेन विश्वान् देवान्नावाहयेत् । ॐ भूर्भुवःस्वः ब्रह्मादयो देवा इहागच्छन्तु इहतिष्ठन्तुः गृह्णन्त्वेताञ्जलीनित्यावाह्य प्रतिमन्त्रमेकैकमंजलीन्दद्यात् ॥ ॐ ब्रह्मा तृप्यताम् ॥ ॐ विष्णु स्तृप्यताम् ॥ ॐ रुद्रस्तृप्यताम् ॐ प्रजापति स्तृप्यताम् ॥ ॐ देवा स्तृप्यन्ताम् ॐ छन्दासि तृप्यन्ताम् ॥ ॐ देवा स्तृप्यन्ताम् ॥ ॐ ऋषयस्तृप्यन्ताम् ॥ ॐ पुराणाचार्या स्तृप्यन्ताम् ॐ गन्धर्वा स्तृप्यन्ताम् ॥ ॐ इतराचार्या स्तृप्यन्ताम् ॥ ॐ सम्वत्सरस स्तृप्यन्ताम् ॐ सम्वत्सरसावयव स्तृप्यताम् ॐ देव्य स्तृप्यन्ताम् ॥ ॐ अप्सरस स्तृप्यन्ताम् ॐ देवानुगास्तृप्यन्ताम् ॥ ॐ नागा स्तृप्यन्ताम् ॥ ॐ सागरा स्तृप्यन्ताम् ॥ ॐ पर्वता स्तृप्यन्ताम् ॥ ॐ सरित स्तृप्यन्ताम् ॥ ॐ मनुष्या स्तृप्यन्ताम् ॥ ॐ यक्षा स्तृप्यन्ताम् ॥ ॐ रक्षांसि स्तृप्यन्ताम् ॥ ॐ पिशाचा स्तृप्यन्ताम् ॐ सुपर्णा स्तृप्यन्ताम् ॥ ॐ भूतानि तृप्यन्ताम् ॥ ॐ पशव स्तृप्यन्ताम् ॥ ॐ वनस्पतय स्तृप्यन्ताम् ॥ ॐ औषधय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तृप्यन्ताम् ॐ भूतग्रामश्चतुर्विध स्तृप्यताम् ॥ यवोदकेन ॐ मरिचि स्तृप्यताम् ॐ अत्रि स्तृप्यताम् ॥ ॐ अङ्गिरास्तृप्यताम् ॥ ॐ पुलस्त्यस्तृप्यताम् ॐ पुलह स्तृप्यताम् ॥ ॐ क्रतु स्तृप्यताम् ॥ ॐ प्रचेता स्तृप्यताम् ॥ ॐ वसिष्ठ स्तृप्यताम् ॥ ॐ भृगु स्तृप्यताम् ॥ ॐ नारद स्तृप्यताम् ॥ ततः कण्ठे❀ सूत्रं कृत्वा निवीत्युदङ्-मुखः कायतीर्थवर्तिना सकुशोदकेन अञ्जली तिरश्चः कुशान् कृत्वा मनुष्यानावा-ह्यतर्पयेत् ॥ ॐ भूर्भुवः स्वः सनकादयः सप्त मनुष्या इहागच्छन्तु इहतिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीनित्यावाह्य द्वौ द्वौ अञ्जली दद्यात् । ॐ सनक स्तृप्यताम्, ॐ सनक स्तृप्यताम् ॥ ॐ सनन्दन स्तृप्यताम्, ॐ सनन्दन स्तृप्यताम् ॥ ॐ सनातन स्तृप्यताम्, ॐ सनातन स्तृप्यताम् ॥ ॐ कपिल स्तृप्यताम्, ॐ कपिल स्तृप्यताम् ॥ ॐ आसुरि स्तृप्यताम्, ॐ आसुरि स्तृप्यताम् ॥ ॐ वोढु स्तृप्यताम्, ॐ वोढु स्तृप्यताम् ॥ ॐ पञ्चशिख स्तृप्यताम् ॥ ततोऽपसव्यं कृत्वा प्राचीनावीती दक्षिणाऽ-भिमुखो भूत्वा पातितवामजानुर्मोटितकुशतिलतोयाञ्जलित्रयेणपितृतीर्थेनखड्गपात्रेण च उसन्तस्त्वा आयन्तुन इति मन्त्रद्वयेन दिव्यपितॄनावाह्यतर्पयेत् ।

ॐ उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि ॥ उशन्नुशतऽआवह

❀ ब्रह्मसूत्र ÷ म्मनुष्य देवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितॄन्हविषेऽअत्तवे॥१॥ ॐआयन्तुनःपितर÷सोम्यासोग्निष्वात्ताःपथि-भिर्द्देवयानैः ॥ अस्मिन्यज्ञे स्वधयामदन्तोऽधिब्रुवन्तुतेवन्त्वस्मान् ॥

इति मन्त्रद्वयं पठित्वा, ॐ भूर्भुवः स्वः कव्यवाडनलादयो दिव्यपितर इहा- २१
गच्छन्तु इहतिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीनित्यावाह्यतिलमिश्रितान् त्रीन् त्रीन-अञ्जलीन्दद्यात् ॐ कव्यवाडनल स्तृप्यतामिदंतिलोदकं तस्मै स्वधानमः; ॐ कव्यवा-डनल स्तृप्यतामिदं तिलोदकं तस्मै स्वधानमः, ॐ कव्यवाडनल स्तृप्यतामिदं तिलोदकं तस्मै स्वधानमः ॥ ॐ सोम स्तृप्यतामिदं तिलोदकं तस्मै स्वधानमः, इति त्रिः ३ ॐ यम स्तृप्यतामिदं तिलोदकं तस्मै स्वधानमः इति त्रिः । ३ ॐ अर्यमा स्तृप्यतामिदं तिलोदकं तस्मै स्वधानमः; इति त्रिः३ ॐ अग्निष्वात्ता स्तृत्यन्तामिदं तिलोदकं तेभ्यः स्वधानमः इति त्रिः ३ । ॐ सोमपा तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधानमः इति त्रिः ३ । ॐ बर्हिषद स्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधानमः इति त्रिः ३ ॐ यमाय नमः ३ ॐ धर्मराजाय नमः ३ ॐ मृत्यवे नमः ३ ॐ अन्तकाय नमः ३ ॐ वैवस्व ताय नमः ३ ॐ कालाय नमः ३ ॐ सर्वभूतक्षयाय नमः ३ ॐ औदुम्बराय नमः ३ ॐ दध्नाय नमः ३ ॐ नीलाय नमः ३ ॐ परमेष्ठिने नमः ३ ॐ वृकोदराय नमः ३ ॐ चित्रायनमः ३ ॐ चित्रगुप्ताय नमः ३ इत्येकैकश स्त्रिस्त्रि स्तर्पयेत् ॥ ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आगच्छन्तु मे पितर इमान् गृह्णन्तु जलाञ्जलीनिति पितृनावाह्य तर्पयेत् ।

ॐ उदीरता मवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः॥
असुंयऽईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरो हवेषु॥

ॐ अद्येहामुकगोत्रोऽस्मत्पिताऽमुकशर्मा वसुस्वरूप स्तृप्यतामिदं तिलोदकं तस्मै स्वधा इति प्रथमाञ्जलिम् ।

ॐ अङ्गिरसोनः पितरोनवग्वाऽअथर्वाणोभृगवः सोम्यासः
तेषाम्बयब ँ ३सुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ।
स्वधा, इति द्वितीयाञ्जलिम् ।

ॐ आयन्तुनः पितरः सोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः॥
अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् ।

ॐ अद्येहामुकगोत्रोऽस्मत्पितामुकशर्मा वसुस्वरूप स्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति तृतीयाञ्जलिं पित्रे दद्यात् ॥

ॐ ऊर्ज्जंवहन्तीरमृतङ्घृतम्पयः कीलालम्परिश्रुतम् ॥
स्वधास्थतर्पयतमे पितृन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अद्येहामुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति प्रथमांजलिम् ॥

ॐ पितृभ्य ÷ स्वधायिभ्य ÷ स्वधानमः ÷ पितामहेभ्यः ÷ स्वधायिभ्य ÷ स्वधानमः प्रपितामहेभ्य ÷ स्वधायिभ्य ÷ स्वधानमः ÷ ॥ अक्षन्नपितरोमीमदन्तपितरोतीतृपन्तपितरः पितरः शुन्धध्वम् । ॐ अद्येहामुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति द्वितीयांजलिम् ।

ॐ येचेहपितरोयेचनेहयाँश्चविद्मयाँऽ२ उचनप्रविद्म ॥ त्वम्वेत्थयतितेजातवेदः स्वधाभिर्यज्ञँ३सुकृतञ्जुषस्व ।

ॐ अद्येहामुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा रुद्रस्वरूप, स्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति तृतीयांजलिम् पितामहाय दद्यात् ॥

ॐ मधुव्वाताऽऋतायतेमधुक्षरन्ति सिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः ॥ ॐ अद्येहामुकगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा आदित्यस्वरूप स्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति प्रथमांजलिम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवँ ँ३रज÷ । मधुद्यौरस्तुनः पिता । ॐ अद्येहामुकगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा आदित्यस्वरूप स्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति द्वितीयांजलिम् । २४

ॐ मधुमान्नोव्वनस्पतिर्म्मधुमाँऽअस्तुसूर्य्य÷ ॥ माध्वीर्गावो भवन्तुनः । ॐ अद्येहामुकगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा आदित्यस्वरूप स्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति प्रपितामहाय तृतीयांजलिं दद्यात् ॥

ॐ आमाव्वाजस्यप्प्रसवोजगम्यादेमेद्यावापृथिवीव्विश्वरूपे ॥ आमागन्ताम्पितरा मातराचामासोमोऽअमृतत्वेनगम्यात् ।

ॐ अद्येहामुकगोत्राऽस्मन्माताऽमुकनाम्नीदेवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा, इति प्रमांजलिं दद्यात् । अनेनैव वाक्येन मात्रे द्वितीय-तृतीयांजली दद्यात् ॥ पूर्वोक्तमन्त्रमुच्चार्य ॐ अद्येहामुकगोत्रास्मत्पितामही अमुकनाम्नीदेवी रुद्रस्वरूपा तृप्यतामिदं तिलोदकं तस्यैस्वधा, इति पितामह्यै प्रथमांजलिं दत्वा, अनेनैव वाक्येन द्वितीय-तृतीयांजली दद्यात् । ततः पूर्वोक्तमन्त्रमुच्चार्य ॐ अद्येहा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रुद्रस्वरूपा तृप्यतामिदं तिलोदकं तस्यैस्वधा, इति पितामह्यै प्रथमांजलिं दत्वा,
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.
अनेनैव वाक्येन द्वितीय-तृतीयांजली दद्यात् । ततः पूर्वोक्तमन्त्रमुच्चार्य ॐ अद्येहा-

मुकगोत्राऽस्मत्प्रपितामही अमुकनाम्नीदेवी आदित्यस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा, इति प्रपितामह्यै प्रथमांजलिं दद्यात्, अनेनैव वाक्येन प्रपितामह्यै द्वितीय-तृतीयांजली दद्यात् ।

ॐ नमोवः पितरो रसाय नमोवः पितरः शोषाय नमोवः पितरो जीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय नमोवः पितरो मन्यवे नमोवः पितरः पितरो नमोवोगृहान्न÷पितरोदत्तसतोव÷पितरो देष्मैतद्ध÷ पित्तरो वास

इति मन्त्रमुच्चार्य ॐ अद्येहामुकगोत्रोऽद्येस्मन्मातामहोऽमुकशर्मा वसुस्वरूप स्तृप्यता-मिदं तिलोदकं तस्मै स्वधा, इति मातामहाय प्रथमाञ्जलिं दद्यात् । एवं द्वितीय-तृतीयाञ्जली अपि देये ॥ ॐ नमो वः इति समग्रं मन्त्रं पठित्वा ॐ अद्येहामुक-गोत्रोऽस्मत्प्रमातामहोऽमुक शर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति प्रमातामहाय प्रथमाञ्जलिं दत्वा, एतदेव वाक्यमुच्चार्य द्वितीय तृतीयाञ्जली अपि तस्मै देये । ॐ नमोवः इति मन्त्रं समग्रं पठित्वा ॐ अद्येहामुकगोत्रोऽस्मद्वृद्धप्रमाता-महोऽमुकशर्मा आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा, इति वृद्धप्रमाता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाय प्रथमांजलिं दत्वा द्वितीय-तृतीयांजली अपि एतदेव वाक्यमुच्चार्य देये। ॐ नमोवः इति मन्त्रेण ॐ अद्येहामुकगोत्राऽस्मन्मातामही अमुकनाम्नीदेवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा, इति प्रथमांजलिं दत्वा अनेनैव वाक्येन द्वितीय- तृतीयांजली दद्यात् ॥ ॐ अद्येहामुकगोत्रऽस्मत्प्रमातामहीअमुकनाम्नीदेवी रुद्रस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा इति प्रमातामह्यै प्रथमाञ्जलिं दत्वा द्वितीय-तृतीयाञ्जली दद्यात्। ॐ अद्येहामुकगोत्राऽस्मद् वृद्धप्रमातामही अमुकनाम्नीदेवी आदित्यस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा इति वृद्धप्रमातामह्यै प्रथमांजलिं दत्वाऽनेनैव वाक्येन द्वितीय तृतीयांजलिं दद्यात् ॥ ततो वक्ष्यमाणश्लोकानुसारेण सपत्नमाता-स्वभार्या-पुत्रादि-ज्येष्ठ कनिष्ठपितृव्य-तत्पत्नी-मातुलमातुलानी-स्वभ्रातृ-तत्पत्नी-पितृस्वसृतत्पतिपुत्र - भ्रातृष्वसृ-तत्पतिपुत्रस्वभगिनी-तत्पतिपुत्र - श्वसुर-दीक्षागायत्री-गुरु-शिष्य-स्वहितकर्तानेतान् समस्तपितॄन् यथोक्तेनाञ्जलिना तर्पयेत् ॥ २९

श्लोकः—❀ तातास्बत्रितयं सपत्नजननी मातामहादित्रयं सस्त्री स्त्री तनयादि

❀ अस्यार्थः—तातास्बत्रितयं पितृ-पितामह-प्रपितामहाः, अम्बात्रितयं-मातृ-पितामही-प्रपितामह्यः, सपत्नजननीसापत्नमाता मातामाहदित्रयं—मातामहाप्रमातामह-वृद्धप्रमातामहाः, एते सस्त्रियः, स्त्री—भार्या तनयादि—पुत्रादि, आदिपदेन पुत्र्योऽपि गृह्यन्ते, तातभ्राता-पितृव्यः सोऽपि स्त्री, जननीभ्राता—मातुलः सोऽपि सपत्नीकः स्वभ्राता—अनुजः, सोऽपि सस्त्री, तातभगिनी पितृष्वसा, सापि अपत्यधवयुक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मातुलः सोऽपि सपत्नीकः स्वभ्राता—अनुजः, सोऽपि सस्त्री, तातभगिनी पितृष्वसा, सापि | अपत्यधवयुक्

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

तातजननीस्वभ्रातरः सस्त्रियः ॥ ताताम्बात्मभगिन्यपत्यधवयुक्जायापिता सत्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे—

ततो वक्ष्यमाणान् आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवादीन्तिलोदकांजलिभिस्तर्पयेत् । ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ॥

तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥ १ ॥ पितृवंशे मृता ये च मातृवंशे तथै च ॥ गुरुश्वसुरबन्धूनां ये चान्ये बान्धवा मृताः ॥ २ ॥ ते तृप्तिमखिला यान्तु ये चास्मत्तोयकाङ्क्षिणः ॥ ये बान्धवाऽबान्धवा येऽन्यजन्मनि बान्धवाः ॥ ३ ॥ ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुनाऽखिला ॥ देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः ॥४॥ पिशाचा गुह्यकाः सिद्धा कूष्माण्डास्तरवः खगाः ॥ जलेचरा भूमिचरा वाय्वाहाराश्च जन्तवः ॥ ५ ॥ ते तृप्तिमखिला यान्तु मद्दत्तेनाम्बुनाऽखिलाः । नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥ ६ ॥ तेषामाप्यायनायैतद्दीयते सलिलं मया ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥ ७ ॥ आब्रह्मभुवनांल्लोकानिद-

---

सापत्या-सधवा इत्यर्थः, अम्बाभगिनी—मातृष्वसा सापि सापत्या सधवा, आत्मभगिनी—निजभगिनी साऽपि सापत्या सधवा, जायापिता—श्वसुरः सद्गुरुर्गायत्रीगुरुः शिष्याः आप्तमित्राणी, एते महालयविधौ—महालयश्राद्धे तीर्थे—तीर्थश्राद्धे, तर्पणे च पितरः तर्पणश्राद्धार्हा इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मस्तु तिलोदकम् ॥ यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम् ॥ ८ ॥ इदमक्षय्यमेवास्तु मया दत्तं तिलोदकम् । अथ वस्त्रनिष्पीडनं विधाय—एके चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥ ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकमिति मन्त्रेण तज्जलं भूमौ क्षिपेत् ॥ ततः सव्यं कृत्वा पूर्वाभिमुखो भूत्वा द्विराचम्य जले ब्रह्मादिदेवान्पूजयेत् ।

ॐ ब्रह्मयज्ञानम्प्रथमं॑ पुरस्ताद्वि॒सीमतः सुरुचो॑ व्वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यव्विष्ठाः शतश्चयोनिमशतश्चव्विवः॑ ।

ॐ ब्रह्मणे नमः ।

ॐ इदं व्विष्णुर्व्विचक्रमे त्रेधानिदधेपदम् ॥ समूढमस्यपाँ ३ सुरे स्वाहा ॥

ॐ विष्णवे नमः ॥

ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवे नमः॑ ॥ बाहुब्भ्यामुतते नमः॑ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवे नमः ॥ बाहुभ्या-
मुतते नम ÷ ॥

ॐ रुद्राय नमः ॥

ॐ भूर्भुवः स्व÷तत्सवितुर्व्वरेण्यम्भर्ग्गो देवस्य धीमहि ॥
धियो योन÷प्प्रचोदयात् ॥

ॐ सवित्रे नमः ॥

ॐ मित्रस्यचर्षणी धृतोवो देवस्यसानसि ॥ द्युम्नश्चित्र-
श्रवस्तमम् ॥

ॐ मित्राय नमः ॥

ॐ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्थोव्वरुणस्यऽ-
ऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ।

ॐ वरुणाय नमः ॥ अथोत्थाय सूर्यार्घ्यं दद्यात् । अर्घपात्रे जलगन्धपुष्पादीनि निक्षिप्य ॥ ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ॥ अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकरः ॐ जगत्साक्षिणे श्रीसूर्यनारायणाय नमः ।—इति मन्त्रेणाऽर्घ्यं दद्यात् । ततः——उत्थायैव सूर्योपस्थानम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अदृश्रमस्यकेतवोब्विरश्मयोजनाँऽअनु ॥ भ्राजन्तोऽअग्नयो यथा ॥ उपयामगृहीतोसिसूर्यायत्वा ब्भ्राजायैषतेयोनिः सूर्यायत्वा-ब्भ्राजाय ॥ सूर्यब्भ्राजिष्ठब्भ्राजिष्ठस्त्वन्देवेष्वसिब्भ्राजिष्ठोहम्मनुष्येषुभू-यासम्॥ ॐ हँ ३सः शुचिषद्वसुरन्तरिक्षसद्धोताव्वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥

इति मन्त्राभ्यां सूर्यमुपस्थाय प्रदक्षिणी कृत्य दिग्भ्य दिग्देवेभ्यश्च प्रणमेत् ॥ ॐ प्राच्यैंदिशे नमः ॐ इन्द्राय नमः ॥ ॐ आग्नेयैदिशे नमः ॐ अग्नये नमः ॥ ॐ दक्षिणस्यैदिशे नमः ॐ यमाय नमः ॐ नैर्ऋत्यैंदिशे नमः ॐ निर्ऋतये नमः ॥ ॐ प्रतीच्यैदिशे नमः वरुणाय नमः ॥ ॐ वायव्यैदिशे नमः ॐ वायव्यो नमः ॥ ॐ उदीच्यैदिशे नमः कुबेराय नमः ॥ ॐ इशान्यैदिशे नमः ॐ ईशानाय नमः ॥ ॐ ऊर्ध्वायैदिशे नमः ॥ ॐ ब्रह्मणे नमः । ॐ अधोदिशे नमः अनन्ताय नमः ॥ ततः उपविश्य प्रणमेत् । ॐ ब्रह्मणे नमः ॥ ॐ अग्नये नमः ॥ ॐ पृथिव्यै नमः ॥ ॐ ओषधिभ्यो नमः ॥ ॐ वाचे नमः ॥ ॐ वाचस्पतये नमः ॥ ॐ विष्णवे नमः ॥ ॐ महद्भ्यो नमः ॐ अद्भ्यो नमः ॐ अपाम्पतये नमः ॥ ॐ वरुणाय नमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ॐ ओषधिभ्यो नमः ।। ॐ वाचे नमः ।। ॐ वाचस्पतये नमः ।। ॐ विष्णवे नमः ।।
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
ॐ महद्भ्यो नमः ॐ अद्भ्यो नमः ॐ अपाम्पतये नमः ।। ॐ वरुणाय नमः ।।

ॐ संवर्च्चसा पयसासन्तनूभिरगन्महिमनसा सँ३शिवेन ।। त्वष्टासुदत्रो व्विदधातुरायोनुमार्ष्टु तन्न्वो यद्विलिष्टम् ।।

इति मन्त्रेण सजलकरद्वयेन मुखं विमृश्य तच्चक्षुरिति मन्त्रेण चक्षुस्पर्शं कुर्यात् ।। २१

ॐ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ।। पश्येम शरदः शतञ्जीवेम शरदः शतँ३ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्यामशरदः शतम्भूयश्च शरदः शतात् ।।

इति मन्त्रेणानामिकाङ्गुष्ठाभ्यां जलं स्पृष्ट्वा चक्षुः स्पर्शंविदधीत ।

ततः ॐ देवागातुविदोगातुंव्वित्वागातुमित ।। मनसस्पतऽइमन्देवय ज्ञँ३स्वाहाव्वातेधा ।।

इति मन्त्रेण पितॄन् विसृज्य, कायेनवाचेति मन्त्रेणेश्वरार्पणं कुर्यात् ।। इति । तर्पणविधिः समाप्तिमगमत् शुभम् ।

श्रीगणेशाय नमः ।। अथैकोद्दिष्टश्राद्धविधिः प्रारभ्यते । श्राद्धकालः । पूर्वाह्ले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातृकं श्राद्धमपराह्णे तु पैतृकम् ॥ एकोद्दिष्टन्तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥ एकपवित्रमेकोऽर्घ एकः पिण्डो नावाहनाग्नौकरणे नात्र विश्वेदेवा तद्यथा—एकोद्दिष्टं देवहीनमेकार्घैकपवित्रकम् ॥ आवाहनाग्नौकरणरहितं ह्यपसव्यवत्, इति स्मृति वचनम् ॥ हस्तौ पादौ प्रक्षाल्य, धौते वाससी परिधाय, नूत्नं यज्ञोपवीतं धृत्वा, श्राद्धदेशमागत्यपाकं सम्पाद्य एकदर्भमयं पितृब्राह्मणं दक्षिणे दिशि उत्तराभिमुखं स्थापयित्वा, श्राद्धं कुर्यात् ॥ अथ श्राद्ध प्रयोगः ॥ पूर्वाभिमुख, आचम्य, प्राणा-नायम्य, पवित्रं धृत्वा, गोमयोपलिप्ते प्राङ्गणे दीपं*याम्याभिमुखं संस्थाप्य प्रज्वाल्य तं च गन्धाक्षतादिभिः सम्पूज्य अपसव्यं कृत्वा, ताम्बूलादिकं विप्रहस्ते दत्वा दक्षिणामुखोभूत्वा उदङ्मुखस्य पितृब्राह्मणस्य वामजानु स्वावमहस्तेन स्पृषट्वा स्ववामजानु च पातयित्वा निमन्त्रयेत् ॥ ॐ अद्येत्यादिदेशकालादीन्सङ्कीर्त्य अमुकगोत्रस्याऽस्मत्पितुरमुकशर्मणः वसुस्वरूपस्याऽद्यकर्तव्यसाम्वत्सरिकैकोद्दिष्टश्राद्ध अनेन ताम्बूल गन्धपुष्पाक्षतेन त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मीति ब्राह्मणः ३२

---

* घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः । बसाभेदोद्भवं दीपं प्रयत्नेव विचर्जयेत् इति शंखवच-नात् ॥ १ ॥ प्राङ्मुखोदङ्मुखं दीपं देवागारे द्विजालये ॥ कुर्याद्याम्यमुखं पित्रे अद्भिः संकल्प सुस्थित मिति वचनात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नात् ॥ १ ॥ प्राङ मुखोदङ मुखं दीपं देवागारे द्विजालये ॥ कुर्याद्याम्यमुखं पित्र्ये आद्यः संकल्प सुस्थित मिति वचनात् ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिवदेत् ॥ ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः । भवितव्यं भवद्भिश्च
मया च श्राद्धकारिणा ॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवितव्यं
भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ॥ इति यजमानोब्रूयात् । ततो ब्राह्मणो भवित-

व्यमिति प्रतिवदेत् ॥ एकं पाद्यपात्रमग्रे कृत्वा, तत्र जलादिकं प्रक्षिप्य तज्जलेन
ब्राह्मणचरणौ प्रक्षालयेदनेनवक्ष्यमाणेन मन्त्रेण ॐ नमोस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे
नमः ॥ यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे ॥ तत्फलं पाण्डवश्रेष्ठ विप्राणां
पादशौचने, इति ॥ ततो जलतिलसहितमोटकमादाय ॐआद्यामुक गोत्राऽस्मत्पितर-
मुकशर्मन् वसुस्वरूपाऽद्यकर्तव्य साम्वत्सरिकैकोद्दिष्टश्राद्धे एषपादार्घस्ते स्वधा । ततः
सव्यंकृत्वाऽऽचम्य गृहं प्रवेशयेत् । अपसव्यं कृत्वा । ॐ आगतायूयम् । ॐ सुस्वाग-
तावयम् । ॐ इदमासनमास्यताम् । ॐ आस्यते इति ब्राह्मणः प्रतिब्रूयात् । इति
ब्राह्मणमुदङ्मुखमुपवेशयेत् ॥ ॐ कर्मपात्रमहंकरिष्ये इति पितृब्राह्मणं पृच्छेत् ।
ॐ कुरुष्वेति ब्राह्मणेनाऽभ्यनुज्ञातः सन् । यद्देवादेवहेडनमिति कण्डिकात्रयेण पवित्रं
गन्धादिकं च स्वस्वमन्त्रैः क्षिप्त्वा कर्मपात्रं कुर्यात् । तत्र मन्त्राः ।

ॐ यद्देवादेवहेडनन्देवासश्चकृमाव्वयम् ॥ अग्निर्म्मातस्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देनसो ऽविश्वान्मुञ्चत्वँ ३ हसः ॥ १ ॥ यदिदिवायदिनक्तमेनाँ३ सिचकृमाऽवयम् ॥ ऽवायुर्म्मातस्मादेनसो विश्वान्मुञ्चत्त्वँ ३ हसः ॥ २ ॥ यदिजाग्रद्यदिस्वप्नऽएनाँ ३सि चकृमाऽवयम् ॥ सूर्य्योमा तस्मादेनसोऽविश्वान्मुञ्चत्व३ँ हसः ॥ ३ ॥ ॐ पवित्रेस्थोऽवैष्णव्गौसवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः ॥

इति मन्त्रेण पवित्रम् ॥

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तुपीतये । शंय्योरभिस्रवन्तुनः,

इति मन्त्रेण जलम् ॥ ॐ तिलोसि सोमदैवत्यो गोसवोदेवनिर्मितः ॥ प्रत्नमद्भिः पृक्तः स्वधयापितॄँल्लोकान्प्रीणाहिनः स्वाहा❀ इति मन्त्रेण तिलान् ॥

❀ यद्यपि स्वाहा देवहविर्दाने इत्यत्रपितृकर्मणि स्वाहाकारोऽयुक्तः तथापि कात्यायनेन महर्षिणा स्वाहान्तस्यैव पाठादनुपपत्तिर्नशङ्कनीया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

* यद्यपि स्वाहा देवहविर्दाने [illegible] कात्यायनेन महर्षिणा स्वाहान्तस्यैव पाठादनुपपत्तिर्न शङ्कनीया ॥

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वे नक्षत्राणि रूप-
मश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ।

इति मन्त्रण पुष्पाणि ॥ ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टांकरीषिणीम् । ३५
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्, इति मन्त्रेण चन्दनम् ।

ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत । अस्तोषतस्वभानवो-
व्विप्रानव्विष्ठयामतीयोजान्विन्द्रते हरी ॥

इति मन्त्रेण अक्षतान् क्षिपेत् ॥ ततः सव्येन कुशत्रयसहितं कर्मपात्रोदक-मादाय ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः । ॐ पुण्डरीकाक्षः पुनात्वित्युक्त्वा श्राद्धदेशं द्रव्याणि आत्मानं च सिञ्चेत् । जलतिलसहितकुशमादाय ॐ अद्येत्यादिदेशकालादीन्संकीर्त्य अमुकगोत्रस्याऽस्मत्पितुरमुकशर्मणो वसुस्वरूपस्याद्यकर्तव्यसाम्वत्सरिकैकोद्दिष्टश्राद्ध-मेभिर्द्रव्यैरहंकर्ष्ये, इति संकल्प्य । ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमोनमः, इति मन्त्रं त्रिर्जपेत्* ॥ ततः । सप्त-

* आदिमध्यावसानेषु त्रिरावृत्तं जपेदबुधः ॥ पितरः क्षिप्रमायान्ति राक्षसाः प्रद्रवन्ति हि, इति हेमाद्रौ ब्रह्माण्डखण्डे वचनात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ । चक्रवाकाः सरद्वीपे हंसाः सरसिमानसे ॥ १ ॥ तेऽपि जाता कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ॥ प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥ २ ॥ ये विप्रमुख्या कुरुजाङ्गलेषु जातास्तथा दासकुले मृगाश्च । कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः ॥ ३ ॥ पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥ यत्र यत्र स्मरेद्विद्वान् पितृणां दत्तमक्षयम् ॥ श्राद्ध-भूमौ गयां ध्यात्वा तथादेवं गदाधरम् ॥ ताभ्यां चैव नमस्कृत्य ततः श्राद्धं समारभेत् ॥ ५ ॥ गया गया गयादित्यो गायत्री च गदाधरः ॥ गया गयासुरश्चैव षड्गया मुक्तिदायकाः ॥६॥ ईशानविष्णुकमलासनकार्तिकेयवह्नित्रयार्करजनीशगणेश्वराणाम् ॥ कौञ्चामरेन्द्र कलशोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥ ७ ॥ ॐ गयायै नमः । ॐ गदाधराय नमः, इति पठित्वा, अपसव्यं कृत्वा, दिग्बन्धनं कुर्यात् । तिलसहितमोटकमादाय, तिलान्पूर्वादिक्रमेण वक्ष्यमाणमन्त्रैः विकिरेत् । ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ॥

अपहताऽअसुरा रक्षाँ३ सिव्वेदिषदः ॥

तथा ॐ बर्हिषदः पान्तु याम्यां ये पितरः स्थिता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपहताऽअसुरा रक्षाँ३ सिव्वेदिषदः ॥

ॐ प्रतीचीमाज्यपाः पितरः पान्तु ॥

अपहताऽअसुरा रक्षाँ३ सिव्वेदिषदः ॥

ॐ उदीचीमपि सोमपाः पितरः पान्तु ॥

अपहताऽअसुरा रक्षाँ३ सिव्वेदिषदः ॥

ॐ ऊर्ध्वतस्त्वर्यमा रक्षेत् कव्यवाडनलोप्यधः ॥ ॐ रक्षोभूतपिशाचेभ्यस्तथैवाऽसुरदोषतः ॥ सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे, इति मन्त्रैस्तिलान्विकोर्य; दिग्बन्धनमोटकमनेन वक्ष्यमाणमन्त्रेण पुष्पसहितं वामकट्यां धारयेत् । ॐ निहन्मि सर्वं यदमेध्यवद्भवेद्धताश्च सर्वेऽसुरदानवा मया ॥ रक्षांसि यक्षाः सपिशाचगुह्यका हता मया यातुधानश्च सर्वे इति ॥ ततस्तिलसहितकुशत्रयं गृहीत्वा, प्रयान्तु दूरतः सर्वे दैतेया दानवास्तथा ॥ सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशाँस्तिलान्, इति मन्त्रेण दक्षिणस्यां क्षिपेत् । ततः सव्यं कृत्वा, विष्णुं स्मरेत् ॐ नमो नमस्तेगोविन्दपुराणपुरुषोत्तम । इदं श्राद्धं हृषीकेश रक्षतां सर्वतोदिशः ॥ अथासनम् । अपसव्यं विधाय जलतिलसहित मोटकमादाय ॐ अद्यामुक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोत्रस्याऽस्मत्पितुरमुकशर्मणो वसुस्वरूपस्याद्यकर्तव्यसाम्वत्सरिकैकोद्दिष्टश्राद्धे इदंमोटकरूपमासनन्तेस्वधा, इति ब्राह्मणाय मोटकरूपमासनन्दद्यात् ॥ ॐ हस्तार्घपात्रमहंकरिष्ये इति पितृब्राह्मणं पृच्छेत्। ॐ कुरुष्वेति पितृब्राह्मणेनाऽभ्यनुज्ञातः सन् एकं पुटकमग्रे कृत्वा, तत्र पवित्रेस्थइति मन्त्रेण पूर्वाग्रं पवित्रं धारयेत्।

ॐ पवित्रेस्थोव्वैष्णव्यौसवितुर्व्वःप्प्रसवऽउत्पुनाम्म्यच्छिद्द्रेण पवित्रेण सूर्य्यस्य रश्मिभिः ॥

शन्नोदेवीरिति मन्त्रेण जलं क्षिपेत्।

ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये ॥ शँय्योरभिस्रवन्तुनः ॥

तिलोसीति तिलान् क्षिपेत्। ॐ तिलोसिसोमदैवत्योगोसवोदेवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्प्रीणाहिनः स्वाहा ॥ श्रीश्चतेइति पुष्पम् ॥

ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वेनक्षत्त्राणि रूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गन्धद्वारामिति गन्धं क्षिपेत् । ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टां करीषिणीम् ॥ ईश्वरीं सर्वभूतानां तामिहो पह्वये श्रियम् ॥ ॐ हस्तार्घपात्रं सम्पन्नमिति पितृ-ब्राह्मणं पृच्छेत् । ॐ सुसम्पन्नमिति पितृब्राह्मणेनोक्ते । ॐ हस्तार्घपात्रमुत्थापया- मीति पितृब्राह्मणं पृच्छेत् । ॐ उत्थापयेति पितृब्राह्मणेनाभ्यनुज्ञातः सन्, हस्तार्घ-पात्रं वामहस्ते कृत्वा, ॐ नमो नारायणाय इति मन्त्रेण पुष्पसहितं पवित्रं पूर्वाग्रं विप्रकरे धृत्वा, वामहस्तस्थ हस्तार्घपात्रं दक्षिणकरेण पिधाय; ॐ यादिव्याऽआपः पयसा सम्बभूवुर्याऽअन्तरिक्षाऽउतपार्थवीर्याः । हिरण्यवर्णा यज्ञिया स्तानऽआपः शिवाः शस्योनासुहवा भवन्तु, इतिमन्त्रेणार्घपात्रस्थजलमभिमन्त्र्य, जलतिलमोटक-मादाय ॐ अद्यासुकगोत्रास्मत्पितरमुकशर्मन् वसुस्वरूप अद्यसाम्वत्सरिकैकोद्दिष्ट-श्राद्धे एषहस्तार्घस्ते स्वधा; इतिब्राह्मणकरे अर्घं दद्यात् अर्घेपुनः प्रत्यर्घं मस्त्विति तदर्घपात्रं भूमौ धृत्वा, सव्यंकृत्वा, तत्रस्थजलेन ॐ तच्चक्षुरितिमन्त्रेण चक्षुः स्पर्शं कुर्यात् ।

ॐ तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् । पश्येमशरद÷शतञ्जीवेमशरद÷शत३ शृणुयामशरद÷शतम्प्रब्रवामशरद ÷ शतमदीनाः स्यामशरद÷शतम्भूयश्चशरद = शतात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोऽपसव्यंकृत्वा, अर्घपात्रं गृहीत्वा पितृब्राह्मणस्य वामपार्श्वेंपित्रे स्थानमसीति न्युब्जं कुर्यात् तदुपरि कुशत्रयं दद्यात् ॥ ततः ॐ अर्चयिष्ये, इति पितृब्राह्मणं पृच्छेत् । ॐ अर्चयेति तेनोक्ते, जलचन्दनपुष्पाक्षतताम्बूलयज्ञोपवीतवस्त्रद्रव्यादिभिः पितृब्राह्मणं सम्पूज्य, निमन्त्रितानन्यानपि ब्राह्मणान् गन्धाक्षतादिभिः समभ्यर्च्य धूपदीपौ च कारयेत् ॥ ततो जलतिलमोटकमादाय ॐ अद्यामुकगोत्राऽस्मत्पितरमुकशर्मन् वसुस्वरूपोऽद्यसाम्वत्सरिकैकोद्दिष्टश्राद्धे एतानि विप्रार्चनानि अत्र गन्धपुष्पाक्षतताम्बूलयज्ञोपवीतधूपदीपनैवेद्यद्रव्यवासांसि ते स्वधा ॥ ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु, इति विप्रकरे जलं दद्यात् ॥ ॐ अस्तु परिपूर्णमिति पितृब्राह्मणः प्रतिवदेत् ॥ ततः सव्यं कृत्वाऽऽचम्य । अपसव्यं कृत्वा, ॐ यथा चक्रायुधोविष्णुस्त्रैलोक्यं परिरक्षति । एवं मण्डलभस्मैतत्सर्वभूतानि रक्षतु, इति मन्त्रेण वामावर्तेन जलेन भस्मना वा*चतुष्कोणं मण्डलं कुर्यात् ॥ ततभूस्वाम्यर्थं तिलघृतमधुजलयुतमन्नंमोटकादिसहितमादाय दक्षिणाभिमुखो भूत्वा, इदमन्नं सजल- ४०

---

* भस्मना वारिणा वापि कारयेन्मण्डलन्ततः ॥ चतुःकोण द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु ॥ मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम्, इति भृगुवचनात् । यातुधाना पिशाचाश्च क्रूरा ये चैव राक्षसाः ॥ हरन्ति रसमन्नस्य मण्डलेन विवर्जितमिति, मार्कण्डेयवचनात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

... यातुधाना पिशाचाश्च क्रूरा ये चैव राक्षसाः ॥
हरन्ति रसमन्नस्य म[illegible] निरीक्षितमिति, मार्कण्डेयवचनात् ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेतद्भूस्वामिपितृभ्यो नमः, इति भूमौमोटकादिकमुत्सृजेत् ॥ अथान्नसंकल्पः । सोपस्करं तिलघृतजलयुतमन्नमुपनीय मधुनाऽभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्याममन्नपात्रमालभ्य, ॐ पृथिवीते पात्रंद्योरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा इत्यालभ्य ।

ॐ इदंविष्णुर्विचक्रमे त्रेधानिदधे पदम् ॥ समूढमस्यपाँ३ सुरे ॥

ॐ विष्णो कव्यमिदं रक्ष मदीयमिति च पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा ॐ इदमन्नमित्यन्ने । ॐ इमा आप इति जले । ॐ इदंहविरिति पुनरन्ने । एतान्युपकरणानि इति क्रमेणान्नजलघृतादिषु विप्रदक्षिणाङ्गुष्ठं निवेश्य । ॐ अपहताऽअसुरा रक्षाँ३ सिव्वेदिषद इति पठित्वा, वामावर्तेन पितृब्राह्मणस्याग्रतो*भूमावेव तिलान्विकीर्य, जलतिलसहितं मोटकमादाय वामहस्ताङ्गुलिभिः क्रमेणन्नमपश्च स्पृष्ट्वा । ॐ अद्यामुकगोत्रायास्मत्पित्रेऽमुकशर्मणे वसुस्वरूपाय अद्यसाम्वत्सरिकैकोद्दिष्टश्राद्धे इदमन्नं सजलं सोपस्करं सपरिविष्टं परिवेक्ष्यमाणमक्षय्यतृप्तिहेतोस्ते

* पृथ्वीचन्द्रोदये पराशरः--सर्वदा च तिलाग्राह्या पितृकृत्ये विशेषतः ॥ भोज्यपात्रे तिलान् दृष्ट्वा निराशाः पितरो गता, इति वचनात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वधेति पितृब्राह्मणसमीपे भूमावेव* मोटकादिकमुत्सृजेत् ॥ अन्नसङ्कल्पसिद्धिरस्तु, इति विप्रकरे जलं दत्वा, भवान् प्राशयतु, इत्यापोशनन्दद्यात् ॥ ततः श्राद्धकर्ता कुशोपरि विशन्, सव्येनाचम्य, सव्याहृतिकां गायत्रीं त्रिर्जपित्वा ।

ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः ॥ ॐ मधुनक्तमुतोषसोमधुमत्पार्थिव ३ँरज÷॥ मधुद्यौरस्तुनः पिता ॥ ॐ मधुमान्नो वनस्पतिर्म्मधुमाँ २ अस्तु सूर्य्यं÷॥ माध्वीर्गावो भवन्तुनः ॥ ॐ मधु मधु मधु,

इति पठित्वा ॐ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वमछिद्रमस्तु भास्करस्य प्रसादतः । ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे ॥ नमः पिनाकहस्ताय बज्रहस्ताय वै नमः इति पठित्वा यथासुखं जुषस्वेति वचनानन्तरं पितृसूक्तं च पठेत् ॐ अग्नयेकव्यवाहनायेत्यादिषट् ६ ॐ तद्देवेत्यादि षोडशः १६ ॐ कृणुष्वपाज इत्यादि पञ्च ५ ॐ सुरावन्तमित्यादि अपांफेनेनेत्यन्तम् ३६ ॐ सहस्रशीर्षेति षोडशः १६ ॐ नमस्ते इति ६६ सर्वसंकलिताः (१४८) ततोऽन्नपात्र-

* धर्मप्रदीपे—श्राद्धीयान्नस्य सङ्कल्पो भूमावेव प्रदीयते ॥ हस्तेषु दीयमानन्तु पितृणां नोपतिष्ठते, इति बचनात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

⁂ धर्मप्रदीपे—श्राद्धीयान्नस्य सङ्कल्पो भूमावेव प्रदीयते ॥ हस्तेषु दीयमानन्तु पितॄणां नोपतिष्ठते, इति वचनात् ।

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDE

सन्निधौ गत्वाऽऽग्नेय्यादिश्यास्तृतदक्षिणाग्रकुशग्रत्रयायां भूमौ विकिरासनं दद्यात् ॥ अपसव्यं कृत्वा मोटकादिकमादाय—असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ॥ उच्छिष्टभागधेयानां दर्भेषु विकिरासनमिति मोटकरूपमासनमास्तृतकुशोपरि उत्सृजेत् ॥ ततः समधुतिलघृतयुतमन्नमादाय जलेनाप्लाव्य, मोटकादिकमादायोत्थाय—अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तुपराङ्गतिमिति मन्त्रेणास्तृतकुशोपरि तदन्नं विकिरेत् ॥ अत्रोङ्काररहितः कार्यः ॥ ततः कुशान्परित्यज्य, सव्यंकृत्वा, हस्तौ पादौ प्रक्षाल्य, द्विराचम्य हरिं स्मरेत् ॥ ततो ब्राह्मणं तृप्तं ज्ञात्वा, अपसव्यं कृत्वा, ॐ जलगण्डूषमिदन्ते इति ब्राह्मणाय प्रत्यपोशनन्दद्यात् । अत्र वाग्विसर्गः सर्वेषाम् । सव्येन सप्रणवव्याहृतिपूर्वां गायत्रीं त्रिर्जपित्वा ।

ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः ॥

ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवः रज ÷ ॥ मधुद्यौरस्तुनः पिता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ मधुमान्नोवनस्पतिर्म्मधुमाँ २ अस्तुसूर्य्य ÷ ।। माध्वीर्गावो भवन्तुनः ।।

ॐ मधु मधु मधु, इति जपित्वा, अपसव्येनैवाञ्जलिं वध्वा, पितृ-ब्राह्मणं-पृच्छेत् । ॐ तृप्ताः स्थः ॐ तृप्तास्मः इति ब्राह्मणः प्रतिवदेत् ॐ शेषमन्नं किं क्रियतांम् ॐ इष्टैः सह भुज्यतामिति प्रतिवदेत् । ॐ पिण्डदानमहङ्करिष्ये । ॐ कुरुष्वेतिपितृब्राह्मणः प्रतिवदेत् ।। ततः पिण्डदानार्थं हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां❀दक्षिणप्लवां पिण्डिकां निर्माय तदुपरि, ॐ ये रूपाणीति मन्त्रेणाङ्गारं भ्रामयित्वा, दक्षिणस्यांक्षिपेत् ।

ॐ ये रूपाणिप्प्रतिमुञ्चमानाऽअसुराः सन्त ÷ स्वधया-चरन्ति । परापुरोनिपुरोये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्म्मात् ।।

ततः पिण्डिकामध्येवामेनपाणिना दर्भपिञ्जलींगृहीत्वा दक्षिणहस्ते कृत्वा,

---

❀ दक्षिणावनतामित्यर्थः—उपलिप्ते शुचीदेशे स्थाने कुर्वीतसैकतम् ।। मण्डलं चतुरस्त्रं वा दक्षिणावनतं महत्, इतिश्राद्धमयूखे देवलवचनात् ।। हस्तमात्रा तथा भूमेश्चतुरङ्गुलमुछ्रिता ।। पिण्डनिर्वापणार्थाय रमणीया विशेषतः, कार्यविदी यथाविधीति शेषः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वनत महत्, इतिश्राद्धमयुखे देवलवचनात ।। हस्तमात्रा तथा [illegible] ।। पिण्डनिर्यापणार्थाय रमणीया विशेषतः, कार्यविदी यथाविधीति शेषः ।।

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDP

सव्योपगृहीत दक्षिणपाणिना ।

ॐ अपहताऽअसुराक्षा ँ३सिव्वेदिषद ÷

इति मन्त्रेण दक्षिणाग्रां रेखां कृत्वा꣸दर्भपिञ्जलीमुत्तरस्यां क्षिपेत् । ततो जलेन शन्नोदेवीरितिमन्त्रेण पिण्डिकामभिषिञ्चेत् । तदनुच्छिन्नमूलकुशान्दक्षिणाग्रान्पिण्डिकायान्दद्यात् ।। ततः सव्यं कृत्वा । ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः इति त्रिवारं पठेत् ।। ततोऽपसव्यं विधाय, एकं पुटकं वामहस्ते कृत्वा, मोटकादिकमादाय, ॐ अद्यामुकगोत्रास्मत्पिरमुकशर्मन् वसुस्वरूपाद्यसाम्वत्सरिकैकोद्दिष्टश्राद्धे पिण्डस्थानेऽवनेजनन्ते स्वधेति छिन्नमूलकुशोपरि अवनेजनन्दद्यात् ।। ततो दक्षिणहस्ते मोटकादिकं पिण्डं चाऽऽदाय वामहस्तेन पुटकादिस्थजलं तत्र निक्षिप्य, ॐ अद्यामुकगोत्राऽस्मत्पितरमुकशर्मन् वसुस्वरूपाऽद्यसाम्वत्सरिकैकोद्दिष्टश्राद्धे एषपिण्डोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतोस्ते स्वधा, इत्यवनेजनोपरि पिण्डं दद्यात्꣸अत्र लेपभागनिषेधः ।। आस्तृतकुशमूलेन

꣸ पिञ्जली पवित्रम्—अनतर्गर्भितं साग्रं कौशं द्विदलमेंव च ।। प्रादेशमात्रं विज्ञेयं यत्र कुत्रचित् ।। एतदेवहिपिञ्जल्यालक्षणंसमुदाहृतमिति छन्दोगपरिशिष्टात् ।

अत पिण्डदानं पितृतीर्थेन उत्तानहस्तेन सव्यजानुपातयित्वा भवति ।। सव्य जानु निपात्यैव भूमौ पिण्डान्प्रयत्नतः ।। निर्वतेत्पितृतीर्थेन स्वधाकारनुदाहरन् इति षट्तृशन्मते वचनोपलम्भात्–उत्तानेनतु हस्तेन निर्वपेद्दक्षिणा मुखः, इति ब्रह्माण्डपुराणात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करं प्रोक्ष्य, कुशान् परित्यज्य, हस्तौ पादौ प्रक्षाल्य, सव्यं कृत्वा, द्विराचम्य, हरिं स्मरेत् ॥ ततः सव्येनैव गन्धपुष्पादीन्यादायोत्थाय पितरमुद्दिश्य,

ॐ अत्रपितरोमादयध्वंयथाभागमावृषायध्वमिति ॥

इति मन्त्रं पठित्वा दक्षिणावर्तेनोत्तराभिमुखो भूत्वा, श्वासं नियम्य, पितरं भास्करमूर्तिं ध्यायन्, अपसव्यं कृत्वा, दक्षिणाभिमुखो भूत्वा,

ॐ अमीमदन्तपितरोयथाभागमावृषायिषत,

इति मन्त्रेण गंधपुष्पादीनि पिण्डोपरि क्षिपेत् ॥ ततोऽवनेजनपात्रं वामहस्ते कृत्वा, तत्पात्रान्मोटकादिकमादाय । ॐ अद्यामुक गोत्राऽस्मत्पितरमुकशर्मन् वसुस्वरूप अद्यसाम्वत्सरिकैकोद्दिष्टश्राद्धे इदम्पिण्डप्रत्यवनेजनन्ते स्वधा ॥ इति पिण्डे प्रत्यवनेजनन्दद्यात् ॥ ततो नीवीं विस्रंस्य सव्यंकृत्वाऽऽचम्य हरिं स्मरेत् ॥ अपसव्यं कृत्वा वामेनपाणिना धृतं सूत्रं दक्षिणेनाऽऽदाय

ॐ नमोवः पितरोरसायनमोवः पितरः शोषायनमोवः पितरोजीवायनमोवः पितरः स्वधायैनमोवः पितरोमन्यवेनमोवः पितरः पितरोनमोवोगृहान्न÷पितरोदत्तसतोव÷

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF
मन्यवेनमोवः पितरः पितरोनमोवोगृहान्न÷पितरोदत्तसतोव÷
पितरोदेष्मैतद्व÷पितरोव्वास,

इति मन्त्रं पठित्वा पिण्डोपरि सूत्रन्दद्यात् ॥ ततः पिण्डं गन्धादिभिः सम्पूज्य, धूपदीपौ च कारयेत् ॥ मोटकादिकमादाय ॐ अद्याऽमुकगोत्राऽस्मत्पितरमुकशर्मन् वसुस्वरूप एतत्साम्वत्सरिकैकोद्दिष्टश्राद्धे एतानि पिण्डार्चनान्यत्रगन्धपुष्पाक्षत-धूपदीपनैवेद्यताम्बूलयज्ञोपवीतद्रव्यादीनि ते स्वधा इति गन्धादिकमुत्सृजेत् ॥ ततो विप्रकरे ! ॐ शिवा आपः सन्तु इति जलम् ॥ ॐ सौमनस्यमस्तु, इति पुष्पम् ॥ ॐ अक्षतं चारिष्टमस्तु, इति तण्डुलान् दद्यात् ॥ ततः सव्यं कृत्वा, पूर्वाभिमुखो भूत्वा वक्ष्यमाणमन्त्रान्पठेत् ॥ ॐ अपांमध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ॥ ब्राह्मणस्य करेन्यस्ता शिवा आपो भवन्तु मे ॥१॥ लक्ष्मीवसतिपुष्पेषुलक्ष्मीर्वसति-पुष्करे ॥ लक्ष्मीर्वसतिगोष्ठेषु सौमनस्यन्ददातु मे ॥ २ ॥ अक्षतं चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा ॥ यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥ ३ ॥ ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिञ्चेत् ॥ ॐ अस्मत्कुले दीर्घमायु-रस्तु । ॐ पुष्टिरस्तु । ॐ वृद्धिरस्तु । ॐ यच्छ्रेयस्तदस्तु । ॐ यत्पापं तत्प्रपति-हतमस्तु इति भूमौ । ॐ द्विपदेचतुष्पदेभ्यः शान्तिरस्तु । ततोऽपसव्यं कृत्वा पिण्ड-समीपे विकिरेत् ॥ ततो वामहस्ते पुटकादिस्थजलं कृत्वा मोटकादिकमादाय ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अद्येहामुकगोत्रस्यास्मपितुरमुकशर्मणो वसुस्वरूपस्याद्य साम्बत्सरिकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामिति पितृब्राह्मणकरेऽक्षय्योदकन्दद्यात्* ॥ ततः सव्यं कृत्वा दक्षिणां दिशमवलोकयन् ॐ अघोरःपितास्तु, इति पिण्डोपरि पूर्वाग्रां जलधारान्दद्यात् । ततः सव्येनैव प्राङ्मुखोभूत्वाऽञ्जलिबध्वाऽऽशिषः प्रार्थयेत् ॥ ॐ गोत्रन्नो वर्धताम् । ॐ वतार्धम् ॐ दातारोनोऽभिवर्धन्ताम्, ॐ वर्धन्ताम् ॥ ॐ वेदाःसन्ततिरेव च, ॐ सन्तु ॥ ॐ श्रद्धाचनो माव्यगमत्, ॐ मागात् ॥ ॐ बहुदेयञ्चनोऽस्तु, ॐ अस्तु ॥ ॐ अन्नञ्चनो बहु भवेत्; ॐ भवतु ॥ ॐ अतिथींश्च लभेमहि, ॐ लभध्वम् ॥ ॐ याचितारश्चनः सन्तु, ॐ सन्तु ॥ ॐ मा याचिष्म कञ्चन, ॐ मायाचेथाः ॥ ॐ एताः सत्या आशिषः सन्तु, ॐ सन्तु ॥ इति ब्राह्मणेभ्यः आशीर्वादान् गृह्णीत । ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात् ॥ ॐ यं कामं कामयते सोऽस्मै कामः समृद्ध्यतामिति मन्त्रेण । ततोऽपसव्यं कृत्वा सपवित्रान्कुशान्न्युब्जपात्रात्समुद्धृत्य पिण्डोपरि निक्षिप्य, ॐ स्वधां वाचयिष्ये, ॐ वाच्यतामिति प्रतिवचनान्तरं रिक्तेन बद्धाञ्जलिना ॐ अद्यामुकगोत्राया-

---

* पितॄणां नाम गोत्रेण करे देयं तिलोदकम् ॥ प्रत्येकं पितृतीर्थेन अक्षय्यमिदमस्तुते इतिवृद्धशातातप वचनात् । प्रत्येकमिति पार्वणपरम् तत्र ब्राह्मणानां बहुत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

ॐ पितृ ... इतिवृद्धशातातप वचनात् । प्रत्येकमिति पार्वणपरम् ततो ब्राह्मणानां बहुत्वात् ।

तिपत्रेऽमुकशर्मणो वसुस्वरूपायाद्यसाम्वत्सरिकैकोद्दिष्टश्राद्धे स्वधोच्यताम् । ॐ अस्तु स्वधा इति प्रतिवचनम् ॥ ततः पयसादि सहितं पुटकं वामहस्ते कृत्वा दक्षिण करेण ॐ ऊर्ज्जंस्ववहन्तीरमृतङ्घृतम्पयः कीलालंपरिश्रुतम् । स्वधास्थतर्पयतमे पितॄन् इति मन्त्रेणसपवित्रकुशोपरि दक्षिणाग्रान् पयोधारान्दद्यात् । ततोऽपसव्येन ॐ पिण्डः सम्पन्न इति ब्राह्मणं पृच्छेत्, ॐ सुसम्पन्न इति तेनोक्ते ॐ पिण्डमुत्थापयामीति प्रश्नः ॐ उत्थापयस्व, इत्यनुज्ञातः सन् नम्रीभूय सव्येन पिण्डमाघ्रायाऽपसव्येनोत्थापयेत् पिण्डाधारकुशानुल्मुकाँश्च वह्नौ क्षिपेत् ॥ सव्यं कृत्वा पिण्डिकायां शंखं चक्रं च लिखेत् । ॐ शङ्खाय नमः, ॐ चक्राय नमः इति यवै शङ्खचक्रपूजां विधाय, अपसव्यं कृत्वा पिण्डमादायोत्थाय, ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात्, इति मन्त्रेण पिण्डं पिण्डिकोपरि निधाय गन्धादिभिर्वक्ष्यमाणमन्त्रैः पूजयेत् । ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ॥ वर्षाभ्यश्च शरत्संज्ञऋतवे च नमो नमः । हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ॥ माससम्वत्सरेभ्यश्च दिवसेभ्यो नमोनमः ततोऽपसव्येनार्घपात्रमुत्तानीकृत्य सव्येन दक्षिणान्दद्यात् कुशतिलजलदक्षिणाद्रव्याण्यादाय ॐ अद्येत्यादिदेशकालौ संकीर्त्य अमुकगोत्रस्याऽस्मतिपतुरमुकशर्मणो वसुस्वरूपस्य कृतैतत्साम्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्सरिकैकोद्दिष्टश्राद्धे पिण्डदानकर्मणः प्रतिष्ठासांगतासिद्ध्यर्थं दक्षिणां रजतं❀ चन्द्रदेवतं तन्मूल्योपकल्पितं द्रव्यममुकदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति विप्रकरे दद्यात् ॥ पुनः कुशादिसहितं दक्षिणा-द्रव्याण्यादाय ॐ तत्सदित्यादिपूर्वसंकल्पं संकीर्त्याद्यामुकगोत्रस्याऽस्मत्पितुरमुक-शर्मणो वसुस्वरूपस्य कृतैतत्साम्वत्सरिकैकोद्दिष्टश्राद्धपिण्डदानकर्मणः प्रतिष्ठासांगता-सिद्ध्यये तन्न्यूनातिरिक्त कर्मणः परिपूर्तये इमां भूयसीं दक्षिणां रौप्यं चन्द्रदेवतं यद्देयमन्नपानादिकं यथानामदेवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाकालेन दातुमहं जले उत्सृजे तत्सन्नमम, इत्युत्सृजेत् । ततोऽपसव्येन ॐ अभि-रम्यताम् ॥ ॐ अभिरम्यताः स्म इति ब्राह्मणं विसर्जयेत् । ततो ब्राह्मणस्य दक्षिणाङ्गुष्ठं गृहीत्वोत्थाप्य ॐ आमाव्वाजस्येति मन्त्रेणत्रिर्वारिधारयाऽऽवेष्टयेत् । ५०

ॐ आमाव्वाजस्यप्रसवोजगम्यादेमेद्यावापृथिवी ऽविश्वरूपे । आमागन्ताम्पितरामातराचामा सोमोऽअमृतत्वेनगम्यात् ॥ ५२२६३

ततः सव्यं कृत्वा ॐ देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः—इति त्रिः पठेत् ॥ अद्य मे सफलं जन्म भवत्पादाब्जवन्दनात् । अद्य मे वंशजाः सर्वे याता वोऽनुग्रहाद्दिवम् ॥ पत्रशाकादि

❀ रजतं पितृभ्य इति परिष्कारवचनात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

❀ रजतं पितृभ्य इति परिष्कारवचनात् ।

दानेन क्लेषिता यूयमीदृशाः ॥ तत्क्लेषजातंचित्तात्तु विस्मृत्य क्षन्तु मर्हथ, इति क्षमापनं प्रार्थयेत् ॥ ततोअपसव्यं विधाय दीपमाच्छाद्य । सव्येन हस्तौ पादौ प्रक्षाल्याऽऽचम्य वक्ष्यमाणमन्त्रं पठेत् । अस्मिन्साम्वत्सरिकैकोद्दिष्टश्राद्धविधौ ॐ यत्कृतं तत्सुकृतमस्तु यन्नकृतं तद्विष्णोः प्रसादाद्ब्राह्मणवचनाच्च सर्वं परिपूर्ण-मस्तु ॐ अस्तु परिपूर्णम् ॥ ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥१॥ ॐ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥ २ ॥ ॐ कायेन वाचा मनसेन्द्रियैर्वाबुद्ध्यात्मना वा प्रकृति स्वभावात् ॥ करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ॥ ३ ॥ इति मन्त्रेणावशिष्टकुशादिकं कर्मपात्रस्थं भूमौ त्यजेत् ॥ ॐ यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु ॥ न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ४ ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां समे विष्णुः प्रसीदतु ॥ ५ ॥ इति पठेत् ॥ ततः पुरोहितादयो ब्राह्मणा गन्धाक्षतपुष्पाणि गृहीत्वा एतान्वक्ष्यमाणमन्त्रान्पठित्वा गन्धादिभिर्यज-मानस्य तिलकं कुर्युः । वैदिकमन्त्राः ॐ शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्रा-जरसन्तनूनाम् । पुत्रासो यत्र पितरो भवन्तिमानोमध्यारीरिषतायुर्गन्तोः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता सपिता सपुत्रः ॥ व्विश्वे देवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ २ ॥ स्वादुष, ३ सदःपितरोव्वयोधाः कृच्छ्रेश्रितः शक्तिवन्तोगभीराः चित्रसेनाऽइषुबलाऽअमृद्धाःसतो वीराऽउरवोव्वात-साहाः ॥ ३ ॥ ब्राह्मणासः पितरःसोम्यासः शिवेनोद्यावा पृथिवीऽअनेहसा ॥
पूषानः पातुदुरितादृतावृधो रक्षामाकिर्नोऽअघश ३ सऽईशत ॥४॥ पितृभ्यः स्वधा-यिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्प्रपितामहेभ्यःस्वधा-यिभ्यः स्वधानमः ॥ अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरः पितरःशुन्द्ध-ध्वम् ॥ ५ ॥ पुनन्तुमा पितरः सोम्यासः पुनन्तुमापितामहाः पुनन्तुमापितामहाः पवित्रेण शतायुषा पुनन्तुमापितामहाःपुनन्तुप्प्रपितामहाः ॥ पवित्रेणशतायुषाव्विश्श्व-मायुर्व्यश्श्नवै ॥ ६ ॥ ततोयजमानो तिलकं गृहीत्वा ब्राह्मणपादान्प्रक्षाल्य पादोदकं गृहीत्वाताञ्ब्राह्मणान्पायसादिभिर्भोजयित्वातेभ्योगृहीताभ्यनुज्ञः सपरिवारः स्वयमे-पिभुञ्जीत ॥ इत्येकोद्दिष्टश्राद्धविधिः समाप्तः ॥ शुभम्भूयात् ॥

प्रकाशक : बालकृष्णाचार्य,

यशोदा पुस्तकालय, दुर्गाघाट

वाराणसी पो० नं० १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अथ पार्वणश्राद्धानुक्रमणिका लिख्यते ॥

भूदेवस्यनिमन्त्रणंद्विजवरस्यार्घस्ततःस्वागतंप्रश्नश्चेतितदुत्तरं कुरु तथासेकं-प्रतिज्ञाजपः । दिग्बंधासनकेपितृनथ पुनश्चावाहयेद्दैवतं हस्तार्घस्तदधो सुखं कुरु पुनः पूजां ततोमण्डलम् ॥ १ ॥ प्रागग्नौकरणं धरापतिनतिः पात्रेऽवशेषंहविस्त्व-न्नानां परिवेषणं मधुजपो मध्वाज्यदानादनु ॥ पात्रालंभनमन्नदानमखिलं कृत्वान्नहीनं जपेदापो विप्रकरेकुशोपरिविशन्मध्वादिकंसंपठेत् ॥ २ ॥ दानं वैकरकंद्विराचमनता सावित्रि मन्त्रो मधुत्वापो विप्रकरेषु पिण्डकरणे प्रश्नस्तथैवोत्तरम् ॥ वेद्यंगारक-शोधनं खलु तथा रेखावसेकस्ततो दर्भाणां प्रकरं प्रसार्य च तथा सव्येन देवं जपेत् ॥ ३ ॥ पिण्डस्यासनताथ पिण्डवपनंहस्तस्यसंप्रोक्षणं प्राग्वच्चाचमनं विचिन्त्य च पितॄन् पिण्डावनेजो जलैः ॥ नीव्या मोच्चनोऽथ सव्यभवन-कुर्याद्धरेःसंस्मृतिःसूत्राचक्षिततोथवान्नवपनादक्षय्यदानं ततः ॥ ४ ॥ सव्या घोरदतीवरार्थिभवनं कुर्य्यात्स्वधावाचनं चोर्जं पिण्डकुशोल्मुकामलकृतिः पात्रोत्थिति-र्दक्षिणा ॥ विप्राणां च विसर्जनं सुरजपो दीपः कराच्छादितः कुर्य्यादाचमनं प्रमादपठनं श्राद्धस्य पूर्णः क्रमः ॥ ५ ॥ ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अथ पार्वणश्राद्धविधिः प्रारभ्यते ॥

अपराह्णे हस्तौ पादौ प्रक्षाल्य धौतेवाससी परिधाय नूतनं यज्ञोपवीतं धृत्वा श्राद्धदेशमागत्य पाकं सम्पाद्य दर्भमयौ द्वौ वैश्वदेवब्राह्मणौ प्रतीच्यां पूर्वाभिमुखौ, दर्भमयौ द्वौ पितृब्राह्मणौ च दक्षिणे उत्तराभिमुखौ स्थापयित्वा पूर्वं श्राद्धाधिकारित्वसिद्धये गोदानं विधाय पार्वणश्राद्धं कुर्यात्। स्त्रीकर्तृकपार्वणश्राद्धे कुशमयाःब्राह्मणाः षट् भवन्ति, अन्वष्टकाश्राद्धेऽपि षट् ब्राह्मणाः कुशमया भवन्ति, एकपार्वणे द्वौ ब्राह्मणौ, एकपार्वणे मातामहादिवर्जं त्रयः पिण्डा भवन्तीति ज्ञेयम् [अथ प्रयोगः] पूर्वाभिमुखोभूत्वा आचम्य प्राणानायम्य पवित्रं धृत्वा गोमयोपलिप्ते प्राङ्गणे दीपं दक्षिणाभिमुखं संस्थाप्य प्रज्वाल्य तं च गन्धाक्षतादिभिः सम्पूज्य पूर्वाभिमुखो विश्वेदेवब्राह्मणौ प्रथमं निमन्त्रयेत् ॥ ताम्बूलादिकं विप्रहस्ते दत्वा स्ववामपाणिना विप्रदक्षिणजानु स्पृष्ट्वा स्वदक्षिणजानुञ्च* पातयित्वा स्वदक्षिणहस्तेनाधोमुखेनसताम्बूलादिकमुत्तानंविप्रहस्तं गृहीत्वा ॐ अद्येत्यादि सङ्कीर्त्य अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्ध सम्बन्धिनां विश्वेषांदेवानां पुरुरवोमाद्रवोनाम्नामद्यकर्तव्यमहालयापरपक्षान्तर्गत-

---

* निपात्य दक्षिणंजानु देवान्परिचरेत्सदा ॥ पितृणां परिचर्या च वामजानुनिपातनादिति धर्मसिन्धुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सम्बन्धिनां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्नामद्यकर्तव्यमहालयापरपक्षान्तर्गत-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

❀ निपात्य दक्षिणंजानु देवान्परिचरेत्सदा ॥ पितृणां परिचर्या च वामजानुनिपातनादिति धर्मसिन्धुः ।

पार्वण श्राद्धेऽनेन ताम्बूलपुष्पाक्षतेन त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मीति प्रतिवचनम् ॥ पुनस्तत्सर्वं पूर्ववद्विधाय ॐ अद्येत्यादि अमुकगोत्राणामस्मन्मातामह-प्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसंबन्धिनां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्नामद्यकर्तव्यमहालयापरपक्षान्तर्गत-पार्वणंश्राद्धेऽनेन ताम्बूलपुष्पाक्षतेन त्वं मया निमन्त्रितः । ॐ निमन्त्रितोऽस्मीति प्रतिवचनम् । ततोऽपसव्यं कृत्वा ताम्बूलादिकं विप्रहस्ते दत्वा दक्षिणाभिमुखो भूत्वा वामहस्तेन पितृब्राह्मस्य दक्षिणजानु स्पृष्ट्वा स्ववामजानु पातयित्वा अधोमुखेन स्वदक्षिणकरेण ताम्बूलादिसहितमुत्तानं विप्रकरं गृहीत्वा निमन्त्रयेत् ॥ ॐ अद्येत्यादि अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रा-दित्यस्वरूपाणामद्यकर्तव्य महालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूलपुष्पाक्षतेन त्वं मया निमन्त्रितः ॥ ॐ निमन्त्रितोस्मीति प्रतिवचनम् । पुनः ॐ अद्येत्यादि अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्य कर्तव्य महालयापरपक्षान्तर्गतपार्वणश्राद्धे अनेन ताम्बूल-पुष्पाक्षतेन त्वं मया निमन्त्रितः ॐ निमन्त्रितोऽस्मीति प्रतिवचनम् । ॐ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ॥ भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवितव्यं भवद्भिर्नोद्यतने श्राद्ध-
कर्मणि ॥ २ ॥ ॐ भवितव्यमिति प्रतिवचनम् । ततः सव्येन पादार्घपात्रे द्वे अग्रे
कृत्वा तत्र कुशजलादिकं प्रक्षिप्य तज्जलेन विश्वेदेवब्राह्मणयोश्चरणान् प्रक्षालयेत् । ५६
ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय
शाश्वते सहस्रकोटी युगधारिणे नमः ॥ ॐ नमोब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥
जगद्धिताय कृष्णाय गोविन्दाय नमोनमः ॥ पाद्यपात्रं वामहस्ते कृत्वा, शन्नोदेवी
इतिमन्त्रं पठित्वा*कुशादिकमादाय अद्याऽमुकगोत्राणामस्मत्पितृपितामहप्रपितामहा-
नाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्त्तव्यमहालयापरपक्षांत-
र्गतपार्वणश्राद्धे श्राद्धसंबन्धिनो विश्वेदेवाः पुरूरवोमाद्रवो नामानः एष पादार्घोवः
स्वाहा ॥ पुनः सर्वं पूर्ववत्कृत्वा कुशादिकमादाय ॐ अद्याऽमुकगोत्राणामस्म-
न्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्य-
स्वरूपाणामद्यकर्त्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसंबन्धिनोविश्वेदेवाः
पुरूरवोमाद्रवानामानः एषपादार्घोवः स्वाहा ॥ ततोऽपसव्येन पितृब्राह्मणयोश्चर-
णान्प्रक्षालयेत् ॥ अत्रापि पूर्वोक्तप्रकारेण पादार्घपात्रं संस्थाप्य तज्जलेनपितृब्राह्मणा-

* पितॄणांद्विगुणा भुग्नादर्भा देवेऋजुत्वगा इति धर्मसिन्धुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वभिषिञ्चेत् ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः ॥ यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठ-पुष्करे । तत्फलं पाण्डव श्रेष्ठ विप्राणां पादशौचने ॥ इति मन्त्रौ पठित्वा मोटकमादाय पाद्यपात्रं वामहस्ते कृत्वा, शन्नोदेवी इतिमन्त्रं पठित्वा ॐ अद्याऽमुकगोत्रा अस्मत्पितृ-पितामहप्रपितामहाः अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्य-महालयापरपक्षान्तर्गतपार्वणश्राद्धे एषः पादार्घस्त्रिधाविभज्य युष्मभ्यं स्वधा ॥ पुनः सर्वं पूर्ववत् कृत्वा मोटकमादाय ॐ अद्यामुकगोत्राः अस्मन्मातामहप्रमातामहवृद्ध-प्रमातामहाः अमुकाऽमुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्यमहालया-परपक्षान्तर्गतपार्वण श्राद्धे एष पादार्घस्त्रेधा विभज्य युष्मभ्यं स्वधा ॥ ततः सव्येना-चम्य गृहं प्रवेशयेत् ॥ ॐ आगता यूयम्, ॐ सुस्वागता वयम्, ॐ इदमासन-मास्यताम्, ॐ आस्यतेइतिप्रतिवचनम् । ॐ भूर्भुवः स्व इतिमन्त्रेण विश्वेदेव-ब्राह्मणौ पूर्वाभिमुखौ उपवेशयेत् । ततोऽपसव्येन ॐ आगता यूयम्, ॐ सुस्वागता वयम्, ॐ इदमासनमास्यताम्, ॐ आस्यते, इति प्रतिवचनम् ॥ ॐ भूर्भुवः स्वः इतिमन्त्रेण पितृब्राह्मणौ उदङ्मुखौ उपवेशयेत् । सर्वत्रप्रश्नेषु पंक्तिमूर्धन्यं पृच्छेत् । ततः सव्येन ॐ कर्मपात्रमहं करिष्ये, ॐ कुरुष्वेत्यनुज्ञातः सन्, ॐ यद्देवादेवदेव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेडनमितिमन्त्रत्रयेणदेवकर्मपात्रं कुर्यात् । ॐ यद्देवादेवहेंडनन्देवासश्चकृमा व्वयम् ॥ अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्वँ३ हसः । यदि दिवा यदि नक्तमेनाँ३ सि चकृमा व्वयम् । व्वायुर्म्मातस्मादेनशो विश्वान्मुञ्चत्वँ३ हसः यदि जाग्रद्यदि स्वप्नऽएनाँ३ सि चकृमा व्वयम् ॥ सूर्योमातस्मादेनसो विश्वान्मुञ्चत्वँ३ हसः ॥ पवित्रेस्थो इति मंत्रेण पवित्रं क्षिपेत् । ॐ पवित्रेस्थो वैश्नव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेणसूर्य्यस्य रश्मिभिः ॥ शन्नोदेवीरितिमन्त्रेण जलम् । ॐ शन्नोदेवीरभिष्टऽआपो भवन्तुपीतये । शंय्योरभिस्रवन्तुनः ॥ श्रीश्चते इति मन्त्रेण पुष्पम् । ॐ श्रींश्चते लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाण-सर्वलोकंमऽइषाण ॥ यवोसीतिमन्त्रेण यवम् ॥ ॐ यवोसियवयास्मद्द्वेषोय्रवयारातोः गन्धद्वारामिति गन्धम् ॥ ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपव्हये श्रियम् । अपसव्यं कृत्वा । ॐ कर्मपात्रमहं करिष्ये, ॐ कुरुष्वेत्यनुज्ञातः सन् ॐ यद्देवादेवहेडनमितिमन्त्रत्रयेण पितृकर्मपात्रं कर्त्तव्यम् ॥ पबित्रेस्थो इतिमन्त्रेण मोटकादिपवित्रं क्षिपेत् ॥ तिलोसीतिमंत्रेण तिलान् ॥ ॐ तिलोसिसोमदैवत्योगोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄन्लोकान्प्रीणयाहिनः स्वाहा ॥ श्रीश्चते इतिमन्त्रेण पुष्पम् । गन्धद्वारामिति गन्धम् ॥ ततः सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय । ॐ अपवित्रःपवित्रो वा सर्वावस्थांग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ततः सव्येन कुशत्रयसहित ... CC-0. In Public Domain. Digitization by eGangotri. Funding: MHRD ... वा सर्वावस्थांग-

तोपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुना-
त्वित्युक्त्वा श्राद्धदेशेद्रव्याण्यात्मानं च सिञ्चेत् । तिलकुशादिकमादाय ॐ अद्येत्या-
दि अमुकगोत्राणामस्मत् पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां
वसुरुद्रादित्यस्वरूपाणां तथामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहा-
नाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पुरूरवोमाद्रवोनाम्नां
विश्वेदेवपूर्वकाणामद्यकर्त्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धमेभिर्द्रव्यैरहं करिष्ये
इतिप्रतिज्ञां कुर्यात् । ततः ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव
च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमोः नमः ॥ इति त्रिः पठित्वा ।
ॐ सप्तव्याधादशार्णेषु मृगाः कालञ्जरे गिरौ । चक्रवाकाः सरद्वीपे
हंसाः सरसि मानसे ॥ तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः । प्रस्थिता
दीर्घमध्वानं यूयं किमवसीदथ ॥ २ ॥ ये विप्रमुख्याः कुरुजाङ्गलेषु जातास्तथा
दासकुले मृगाश्च । कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्रसिद्धाः ॥३॥
पञ्चक्रोशं गया क्षेत्रं क्रोशमेकं गयाशिरः । यत्र यत्र स्मरेद्विद्वान्पितृणां दत्तमक्षयम्
॥ ४ ॥ श्राद्धभूमौ गयां ध्यात्वा तथा देवं गदाधरम् । उभाभ्यां च नमस्कृत्य ततः
श्राद्धं समारभेत् ॥ ५ ॥ गया गया गयादित्यो गायत्री च गदाधरः । गया गया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुरश्चैव षड्गया मुक्तिदायका: ।। ६ ।। ईशान विष्णुकमलासनकार्तिकेयवह्नित्रयार्करजनीशगणेश्वराणाम् । क्रौञ्चामरेन्द्रकलशोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतो: ।।७।। ॐ गयायै नम: ॐ गदाधराय नम: । ततोऽपसव्येन दिग्बन्धनं कुर्यात् । तिलसहितमोटकमादायतिलान्पूर्वादिक्रमेण वक्ष्माणमन्त्रैर्विकिरेत् । ॐ अग्निष्वात्ता: पितृगणा: प्राचीं रक्षन्तु मे दिशम् ।। अपहता असुरारक्षाँ३ सिव्वेदिषद: ॐ तथाबर्हिषद:ँ, पान्तु याम्यां ये पितर: स्थिता: ।। ॐ अपहता असुरारक्षाँ३ सिव्वेदिषद: ॐ प्रतीचीमाज्यपा: पितर: पान्तु । अपहता असुरारक्षाँ३ सिव्वेदिषद: । ॐ उदीचीमपि सोमपा: पितर: पान्तु ।। अपहता असुरारक्षाँ३ सिव्वेदिषद: । ॐ उर्ध्वंतस्त्वर्यमा रक्षेत्कव्यवाडनलोप्यध: ।। रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषत: ।। सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे । मोटकं वामकट्यान्धारयेदनेन मन्त्रेण ॐ निहन्मि सर्वं यदमेध्यवद्भवेद्धताश्चसर्वेऽसुरदानवा मया रक्षांसि यक्षा: सपिशाच गुह्यका हतामया यातुधानाश्च सर्वे इति नीवीबन्धनम् ।। तिल सहित कुशत्रयं गृहीत्वा, प्रयान्तु दूरत: सर्वे दैतेया दानवास्तथा ! सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशान्तिलान् । इति तिलसहितकुशं दक्षिणस्यां क्षिपेत् ।। इति दिग्बन्धननीवीबन्धने ।। तत: सव्येन ॐ नमो नमस्तेगोविन्दपुराणपुरुषोत्तम । इदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिग्बन्धननीवीबन्धने ॥ ततः सव्येन ॐ नमो नमस्ते गोविन्दपुराणपुरुषोत्तम । इदं
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्राद्धं हृषीकेश रक्षतां सर्वतोदिशः इतिरक्षार्थं विष्णुस्मरणम् ॥ अथासनम् सव्येनैव कुशमादाय ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणांश्राद्धसम्बन्धिनां विश्वेषां देवानां पुरुरवोमाद्र-

वोनाम्नामिदं कौशमासनं वः स्वाहा । पुनः कुशमादाय ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बधिनां विश्वेषां देवानां पुरुरवोमाद्रवोनाम्नां इदं कौशमासनं वः स्वाहा ॥ इति देवब्राह्मणाय कुशरूपमासनं दद्यात् ॥ ततोऽपसव्यं कृत्वा, मोटकमादाय ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदं मोटकरूपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा ॥ पुनर्मोटकमादाय ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांसपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे इदंमोटकरूपमासनं त्रेधा विभज्य युष्मभ्यं स्वधा । ततः सव्येन यवसहितं अञ्जलिंबध्वा विश्वेदेवानावाहयेत् । ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथाऽमुक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोत्रामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वान्देवान् पुरूरवोमाद्रावोनाम्नः आवाहयिष्ये ॥ ॐ आवाहयेति प्रतिवचनम् । विश्वेदेवासऽआगतश्शृणुतामऽइम ँ३ हवम् ॥ एदंबर्हिर्निषोदत, इतिमन्त्रेणावाह्य । ॐ यवोसियवयास्मत्द्वेषोयवयारातोः । इति मन्त्रेण श्राद्धदेशे यवान् विकीर्य । ॐ विश्वेदेवाः शृणुतेम ँ३ हवम्मे येऽअन्तरिक्षे यऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवाय-जत्राऽआसद्यास्मिन्वर्हिषिमादयध्वम्, इति मन्त्रं पठित्वा । ॐ आगच्छन्तु महाभागा विश्वेदेवाः महाबलाः । ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥ ततोऽपसव्येन तिलसहिताऽञ्जलिबध्वापितृनावाहयेत् । ॐ अद्यामुकगोत्रानस्मत्पितृपितामहप्रपिता-महानमुकाऽमुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपान् तथाऽमुकगोत्रानस्मन्माता-महप्रमातामहवृद्धप्रमातामहान् अमुकामुकशर्मणः सपत्नीकान्वसुरुद्रादित्यस्वरूपानद्य-कर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे आवाहयिष्ये ॥ ॐ आवाहयेति प्रतिव-चनम् । ॐ उसन्तस्त्वानिधीमह्यशन्तः समिधीमहि ॥ उशन्नुशतऽआवहपितृन्हविषे अत्तवे, इति मन्त्रेणवाह्य । ॐ अपहताऽअसुरारक्षा ँ३ सिव्वेदिषदः, इति मन्त्रेण श्राद्धदेशे तिलान्विकीर्य ॥ ॐ आयन्तुनः पितरः सोम्यासोग्निष्वाताः पथिभिर्देव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

श्राद्धदेशे तिलाद्विकीर्णा ।। ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देव-

यानैः ।। अस्मिन्यज्ञे स्वधयामदन्तोधिब्रुवन्तुतेबन्त्वस्मान्, इतिमन्त्रं पठेत् । ततः सव्येन विश्वेदेवब्राह्मणौ पृच्छेत् । ॐ हस्तार्घपात्रमहंकरिष्ये । ॐ कुरुष्वेत्यनुज्ञातः सन्, पुटकद्वयमग्रे कृत्वा । ॐ पवित्रेस्थोव्वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनास्यच्छिद्रेणपवित्रेण सूर्यस्यरश्मिभिः ।। इति मन्त्रेण पूर्वाग्रे पवित्रे पुटकद्वयं धारयेत् ।
ॐ शन्नो देवी—इति मन्त्रेण पुटकद्वये जलं क्षिपेत् । ॐ यवोसि इति मन्त्रेण यवान् क्षिपेत् । ॐ श्रीश्चतेलक्ष्मीरितिमन्त्रेण तत्रैव पुष्पाणि । क्षिपेत् । ॐ गन्धद्वारांदुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियमितिमन्त्रेण तत्रैव गन्धं क्षिपेत् । ततः ॐ हस्तार्घपात्रं संपन्नमिति देवब्राह्मणं पृच्छेत् । ॐ सुसंपन्नमितितेनोक्ते ॐ हस्तार्घपात्रमुत्थापयामि, ॐ उत्थापयस्वेति वचनानन्तरम् हस्तार्घपात्रं वामहस्ते कृत्वा, तस्मात् पुष्पसहितं पवित्रं दक्षिणकरे गृहीत्वा, ॐ नमोनारायणायेति मन्त्रेण विप्रकरे पुष्पसहितं पूर्वाग्रं पवित्रं धृत्वा, दक्षिणकरेण वामकरस्थपुटकमुखं पिधाय । ॐ यादिव्या आपः पयसासम्बभूवुर्याऽअन्तरिक्षाऽउतपार्थवीर्याः । हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः सँ३ स्योनासुहवाभवन्तु इतिमन्त्रेणार्घपात्रस्थजलमभिमन्त्र्य कुशयवजलान्यादाय । ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानामसुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्य कर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवा पुरूरवोमाद्रवोनामानः एष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हस्तार्घो वः स्वाहा, इति देवब्राह्मणकरे अर्घ्यं दद्यात् ।। अर्घं पुनः प्रत्यर्घमस्तु तदर्घपात्रं भूमौ धृत्वा अपरार्घपात्रं वामहस्ते कृत्वा, सर्वंपूर्ववदेव कृत्वा पिधाय यवजलकुशान्यादाय । ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानामुकामुकशर्मणांसपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे ६४
श्राद्धसंबन्धिनोविश्वेदेवाः पुरूरवोमाद्रवोनामानः एषः हस्तार्घोवः स्वाहा, इति देवब्राह्मणकरे अर्घं दद्यात् । अर्घंपुनःप्रत्यर्घमस्तु, ततोऽर्घपात्रद्वयस्थजलेन ॐ तच्चक्षुरितिमन्त्रेणचक्षुस्पर्शः कार्यः तदनन्तरं पवित्रसहिते अर्घपात्रे स्वस्वविश्वेदेवदक्षिणापार्श्वे ॐ विश्वेभ्यो देवेभ्यः स्थानमसीतिवाक्येन देवार्घपात्रे उत्ताने स्थापयेत् । ततोऽपसव्येन । ॐ हस्तार्घपात्राण्यहकरिष्ये इति पितृब्राह्मणं पृच्छेत् । ॐ कुरुष्वेत्यनुज्ञातःसन् पित्रादिमातामहाद्यर्घपात्रार्थं स्वाग्रमेकं पुटकमासाद्य, तयोः पुटकयोर्दक्षिणसंस्थं पुटकद्वयमासाद्य तेषु पुटकेषु षट्सु ॐ पवित्रेस्थोवैष्णव्योसवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः इतिमन्त्रेण उत्तराग्राणि पवित्राणि धारयेत् । ॐ शन्नो देवीरितिमन्त्रेण तत्र जलं क्षिपेत् ॐ तिलोसिसोमदैवत्यो गोसवोदेवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधयापितृन्लोकान्प्रीणयाहिनः स्वाहा, इतिमन्त्रेण तिलान् क्षिपेत् । ॐ श्रीश्चतेलक्ष्मीरितिमन्त्रेण पुष्पाणि क्षिपेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इतिमन्त्रेण तिलान् क्षिपेत् । ॐ श्रीश्चतेलक्ष्मीश्चेतिमन्त्रेण पुष्पाणि क्षिपेत् ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गन्धद्वारामितिमन्त्रेण चन्दनं क्षिपेत् । ॐ हस्तार्घपात्राणि सुसपन्नानि, इति पितृब्राह्मणं पृच्छेत् । ॐ ... र्घपात्राणि सुसंपन्नानि, इतितेनोक्ते । ॐ हस्तार्घपात्रमुत्थापयामि, इति पृच्छेत् । ॐ उत्थापस्वेति प्रतिवचनान्तरं प्रथमं पित्र्यर्घपात्रं बामहस्ते कृत्वा, ॐ नमो नारायणायेति मन्त्रेण विप्र करे सपुष्पमुत्तराग्रं पवित्रं धृत्वा बामकरस्थ हस्तार्घपात्रं स्वदक्षिणकरेण पिधाय । ॐ यादिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उतपार्थवीर्याः हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः सँ३स्योनासुहवाभवन्तु, इति मन्त्रेणार्धपात्रस्थजलमभिमन्त्र्य तिलजलमोटकमादाय । ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्सपत्नीक वसुस्वरूपाद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एषः हस्तार्घस्ते स्वधा, इति ब्राह्मणकरेअर्घं दद्यात् ॥ ॐ अर्घेपुनः प्रत्यर्घमस्तु तदर्घपात्रं भूमौधृत्वा, एवं यथाक्रमेण पितामहादिभ्यो मातामहादिभ्यो दद्यात् । ततः प्रपितामहार्घपात्रस्थजलादिकं पितामहार्घपात्रे कृत्वा, तत्सर्वं पित्र्यर्घपात्रे कृत्वा पित्र्यर्घपात्रमुत्तानं पितामहार्घपात्रोपरि धृत्वा, तदुभयपात्रमुत्तानं प्रपितामहार्घपात्रोपरि धृत्वा, एवं मातामहार्घपात्राणि कृत्वा, सव्यं कृत्वा, तत्रस्थजलेन । ॐ तच्चक्षुरितिमन्त्रेण चक्षुः स्पर्शः कार्यः । तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत् । पश्येमशरदः शतञ्जीवेमशरदःशत ँ३श्रृणुयामशरदः शतम्प्रब्रवामशरदः शतमदीनाः स्यामशरदः शतंभूयश्च शरदःशतात् । ततोऽअपसव्येन एकत्रकृत्रं पित्राद्यर्घपात्रं

९२२८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहीत्वा पितृद्विजस्याऽसनवामभागे, ॐ पितृभ्यः स्थानमसीतिन्युब्जं कुर्यात्, तदुपरि कुशत्रयं दद्यात् ॥ एवमेकत्रकृतं मातामहाद्यर्घपात्रं गृहीत्वा, मातामहद्विजस्यासनबामभागे, ॐ मातामहेभ्यः स्थानमसीतिन्युब्जं कुर्यात्, तदुपरि कुशत्रयं दद्यात् । ततः सव्येन । ॐ अर्चयिष्ये, इति देवब्राह्मणौ ब्रूयात् । ॐ अर्चयेत्युक्ते, गन्धपुष्पाक्षतताम्बूलयज्ञोपवीतैर्विश्वेदेवब्राह्मणौउपायनद्रव्यवस्त्रादिभिः समभ्यर्च्य अन्य ब्राह्मणीतिलकं दत्वा धूपदीपनैवेद्यादीनि च कारयेत् ॥ कुशादिकमादाय ॐ अद्याऽमुकगोत्राणामस्मत् पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यसहालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोनामानः एतानिविप्रार्चनानि अत्र गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतोपायनवासांसि वः स्वाहा इत्युत्सृजेत् पुनः कुशादिकमादाय ॐ अद्यामुकगोत्राणामस्मन्मातामहानाममुकाऽमुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्य कर्तव्यसहालयापरपक्षान्तर्गत पार्वणश्राद्धे श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोनामानः एतानिविप्रार्चनानि अत्रगंधपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतोपायनवासांसि वः स्वाहा, इत्युत्सृजेत् । ततोऽपसव्येन ॐ अर्चयिष्ये इतिपितृब्राह्मणौपृच्छेत् । ॐ अर्चयेत्युक्तेगन्धादिभिरभ्यर्च्यअन्यब्राह्मणाय तिलकं दत्वा धूप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.
ब्राह्मणौपृच्छेत् । ॐ अर्चयेत्युक्तेगन्धादिभिरभ्यर्च्यअन्यब्राह्मणाय तिलकं दत्वा धूप-

दीपौ च कारयेत् । मोटकादिकमादाय ॐ अद्यामुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकाऽमुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धेएतानिविप्रार्चनान्यत्रगंधपुष्पाक्षतधूपदीपनैवेद्यताम्बूल यज्ञोपवीतोपायनवासांसि त्रेधाविभज्य युष्मभ्यं स्वधा । पुनर्मोटकमादाय ॐ अद्यामुकगोत्राः—अस्मन्मातामहप्रमातामहबृद्धप्रमातामहाः अमुकाऽमुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धेएतानिविप्रार्चना, न्यत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलयज्ञोपवीतोपायनवासांसि त्रेधाविभज्य युष्मभ्यं स्वधा । सव्येन । विश्वेदेवब्राह्मणहस्तयोः । ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु, इति जलं दद्यात् । ॐ अस्त्वितिप्रतिवचनम् । अपसव्येन । पितृब्राह्मणहस्तयोः । ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु, इति जलं दद्यात् । ॐ अस्त्विति प्रतिवचनम् । सव्येन । देवब्राह्मणयोर्भोजनस्थाने जलेन भस्मना वा * चतुर्दिक्ष्वासनसहितं चतुःकोणमण्डलं कुर्यात् । अपसव्येन । पितृब्राह्मणयोर्भोजनस्थाने जलेन भस्मना वा चतुर्दिक्ष्वासन- ६७

---

* भस्मना वारिणा वापि कारयेन्मण्डलन्ततः ॥ चतुःकोणंद्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु ॥ मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतमिति भृगुः. यातुधानाः पिशाचाश्च क्रूरा ये चैव राक्षसाः । हरन्ति रसमन्नस्य मण्डलेन विवर्जितमिति मार्कण्डेयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहितं चतुःकोणं मण्डलं कुर्यात् । अपसव्येनैवाग्नौकरणं, दक्षिणाभिमुखः प्राचीनावीती पातितवामजानुः पुटकादौसघृतमन्नं कृत्वा ॐ अग्नौकरिष्ये + इति पितृब्राह्मणं पृच्छेत्, ॐ कुरुष्वेत्यनुज्ञातस्सन् पितृब्राह्मणकरे जलपात्रे वा जुहूयात् ।
ॐ अग्नयेकव्यवाहनाय स्वाहा इदमग्नये कव्यवाहनाय । ॐ सोमाय पितृमते स्वाहा इदं सोमायपितृमते; इत्याहुतिद्वयं जुहूयात् । हुतशेषान्नं सव्येन विश्वेदेवब्राह्मणपात्रोपरि क्षिपेत् । अपसव्येन पितृब्राह्मणपात्रेषु क्षिपेत् ततोपसव्यनैव-तिलघृतमधुजलयुतमोटकादिसहितमन्नमादाय दक्षिणाभिमुखो भूत्वा; ॐ इदमन्नं सजलमेतद्भूस्वामिपितृभ्यो नमः; इत्युत्सृजेत् । अथान्नसंकल्पः । सव्येन; तत्र विश्वेदेवान्ध्यायन्सोपरकरंयवजलयुतमन्नमुपनीयमधुनाभिघार्य ऋजुहस्ताभ्यामन्नपात्रमालभ्य ॐ पृथिवीते पात्रं द्यौरपिधानं ब्राह्मणस्यमुखे अमृते अमृतंजुहोमि स्वाहा । ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधे पदम् ॥ समूढमस्यपा ३ँ सुरे स्वाहा इतिमन्त्रं पठित्वा कृष्णकव्यमिदं रक्ष मदीयमिति पठित्वा, विप्रदक्षिणाङ्गुष्ठं निवेश्य, ॐ इदमन्नमित्यन्ने । ॐ इमा आपः इतिजले । ॐ इदमाज्यमितिघृते । ॐ इदं हविरिति-

+ अत्र च अग्नौ करिष्ये, इत्वेव प्रश्न उचित नात्वग्नीकरमिति, क्वापि निबन्धेऽनुपलम्भात् । जुहुयु सःव्येनापसव्येन याजुषा इति याज्ञवल्क्यवचनेन छन्दोगानां सव्येन, याजुषाणामपसव्येनाग्नौकरणमिति व्यवस्था ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुनरन्ने ॐ एतान्युपकरणानि । इतिक्रमेण न्नजलघृतेषुविप्रकरं निवेश्य । ॐ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरन्ने ॐ एतान्युपकरणानि । इतिक्रमेणान्नजलघृतेषुविप्रकरं निवेश्य । ॐ यवोसियवया इतिमन्त्रेण यवान्नोपरि विकीर्य, कुशयवजलान्यादाय वामहस्ताङ्गुल्यङ्गुष्ठैः क्रमेणान्नमापश्च स्पृष्टा । ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्म्मणां सपत्नीकानां बसुरुद्रादित्यस्वरूपाणां श्राद्धसंबन्धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरबोमाद्रवोनामभ्यः अद्यकर्तव्य महालयापरपक्षान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं सपरिविष्टं परिवेक्ष्यमाणं अक्षय्यतृप्तिहेतोर्व, स्वाहा इति कुशादिकमुत्सृजेत् । पुनः पूर्ववत्विधाय कुशादिकमादाय । ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुक शर्मणां सपत्नीकानां बसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिभ्यो विश्वेभ्यो देवेभ्यः पुरूरवोमाद्रवोनामभ्यः अद्यकर्तव्य महालयापरपक्षान्तर्गतपार्वणश्राद्धे इदमन्नं सजलं सोपस्करं सपरिविष्ट परिवेक्ष्यमणमक्षय्यतृप्तिहेतोर्वः स्वाहा इतिकुशादिकमुत्सृजेत् । ततोऽपसव्येन । सोपस्करं तिलघृतजलयुतमन्नमुपनीय मधुनाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य, ॐ पृथिवी ते पात्रं द्यौरपिधानं इत्यादि स्वाहान्तं पठित्वा विप्रदक्षिणाङ्गुष्ठं गृहीत्वा ॐ इदमन्नं । ॐ इमा आपः । ॐ इदमाज्यं । ॐ इदं हविरिति पुनरन्ने । ॐ एतान्युपकरणानीतिक्रमेणान्नजल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य। ॐ अपहताऽअसुरारक्षा ३ँ सिव्वेदिषद: इतिब्राह्मणा-
नामग्रतोभूमावेव ❀ तिलान्विकीर्य, मोटकादिन्यादाय वामहस्ताङ्गुलिभि:
क्रमेणान्नमापश्चस्पृट्वा, ॐ अद्यामुकगोत्रायास्मत्पित्रेऽमुकशर्मणे सपत्नीकाय
वसुस्वरूपाय अद्यकर्त्तव्य महालयापरपक्षान्तर्गतपार्वणश्राद्धेइदमन्नं सजलं सोपस्करं
सपरिविष्टं परिवेक्ष्यमाणमक्ष्य्यतृप्तिहेतोस्ते स्वधा इति पितृब्राह्मणसमीपे भूमौ
मोटकादिकमुत्सृजजेत्। एवं पितामहादिमातामहादिभ्यो: पञ्चभ्यो दद्यात्।
तत: सव्येन। देवब्राह्मणकरयो:, ॐ भवन्तौ प्राशयेतामित्यापोशनं दद्यात्।
अपसव्येन। पितृब्राह्मणकरेषु ॐ भवन्त: प्राशयन्तु इत्यापोशनं दत्वा।
सव्येन। श्राद्धकर्ता कुशोपरि विशन् ॐ मधुव्वाता इत्यृच: वठेत्। ॐ मधु-
व्वाता ऋतायते मधुक्षरन्ति सिन्धव:॥ माध्वीर्न: सन्त्वोषधी:। ॐ मधुनक्तमुतो-
षसोमधुमत्पार्थिव ँ३रज:॥ मधुद्यौरस्तुन: पिता॥ ॐ मधुमान्नो व्वनस्पतिम्मंधुमां-
ऽअस्तुसूर्य्य:॥ माध्वीर्गावोभवन्तुन:। ॐ मधुमधुमधु, इति पठित्वा, ॐ अन्नहीनं
क्रियाहीनं विधिहीनं च यद्भवेत्॥ सत्सर्वमच्छिद्रमस्तु श्रीभास्करस्यप्रसादत:॥
ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे। नम:; पिनाकहस्ताय वज्रहस्ताय वै नम:

❀ अपहता इति मन्त्रेण ब्राह्मणानामग्रतोभूमावेव तिलान्विकिरेदिति कर्काचार्य गृ० सू०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति पठेत् ॥ यथासुखं जुषध्वमितिवचनानन्तरं ते ब्राह्मणा मौनीनोभूत्वा भुञ्जी-रन्संज्ञया च भक्ष्यं प्रार्थयेयुः ॥ ततः सव्याहृतिकां गायत्रींत्रिर्जपित्वा; मधुव्वातेति-ऋचश्च पठित्वा, पितृसूक्तञ्च पठेत्, तदेव १६ अग्नये कव्यवाहनाय षट् ६ कृणु-ष्वपाज इतिपञ्च ५ सुरावन्तमित्यादि अपांफेनेनेत्यन्तम् ६६ सहस्रशीर्षेति षोडश १६ नमस्ते इति समस्तम्, आशुः शिशान इति द्वादश १२ इति पितृसूक्तं पठेत्। ब्राह्मणानां यत्रतत्रेच्छोपलभ्यते तत्तत् प्रयच्छन्मन्दंमन्दं भोजयेत्। ततः पितामहान्नपात्रसंन्निधौनैर्ऋत्यांदिशिआस्तृतदक्षिणाग्रकुशत्रयायां भूमौ विकिरासनं दद्यात्। अपसव्येन मोटकादिकमादाय असंस्कृतप्रमीतानांत्यागिनां कुलयोषिताम्। उच्छिष्टमागधेयानां दर्भेषु विकिरासनम्; इतिमन्त्रेण मोटकरूपमासनमास्तृतकुशोपरि-उत्सृजेत्। सतिलघृतमन्नमादायजलेनाप्लाव्य❀ मोटकादिकमादाय : अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तुपरांगतिम् इतिमत्रणा-स्तृतकुशोपरि अन्नंविकिरेत् ॥ ततः कुशान्परित्यज्य हस्तौ पादौ प्रक्षाल्य; सव्येन द्विराचम्य; गायत्रींत्रिजपित्वा मधुव्वाता इत्यादि पठेत् ॥ ततो ब्राह्मणान् तृप्तान्ज्ञात्वा; ॐ जलगण्डूषमिदन्ते। इति उभाभ्यां विश्वेदेवब्राह्मणाभ्यां ७१

❀ आर्द्री कृत्वा-इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्येकं प्रत्यापोशनं दद्यात् । सव्येनैवाञ्जलिं बध्वा विश्वेदेवब्राह्मणौप्रति प्रश्नः । ॐ तृप्तास्थः ॐ तृप्तास्मः इतिप्रतिवचनम् । ॐ शेषमन्नं किं क्रियतामिति प्रश्नः, ॐ इष्टैः सह भुज्यतामिति प्रतिवचनम् । ॐ पिण्डदानमहंकरिष्ये, ॐ कुरुष्व, इति प्रतिवचनम् । अपसव्येन । ॐ जलगण्डूषमिदन्ते इति पितृब्राह्मणाभ्यां प्रत्येकं प्रत्यपोशनं दद्यात् । अपसव्येनैव पितृब्राह्मणौ प्रति प्रश्नः ॐ तृप्तास्थ, ॐ तृप्तास्म इति प्रतिवचनम् । ॐ शेषमन्नं किं क्रियताम्, ॐ इष्टैः सह भुज्यतामिति प्रतिवचनम् । ॐ पिण्डदानमहंकरिष्ये, ॐ कुरुष्वेत्यनुज्ञातः सन् । ततः पिण्डदानार्थं हस्तैकपरिमितां चतुरस्रां चतुरङ्गुलोच्छ्रितांसैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय तदुपरि ॐ येरूपाणि प्रतिमुञ्चमानाऽअसुराःसन्त÷स्वधया चरन्ति । परापुरोनिपुरो येभरन्त्यग्निष्ठाँल्लोकात्प्रणुदात्यस्मात्; इतिमन्त्रेणाङ्गारं भ्रामयित्वा, तदङ्गारं दक्षिणस्यां क्षिपेत् ॥ ततः पिण्डिका मध्ये वामेन पाणिना दर्भपिञ्जलीं꙳ गृहीत्वा दक्षिणहस्ते कृत्वा सव्योपगृहीतदक्षिणपाणिना ॐ अपहता असुरारक्षा ँ३ सिव्वेदिषदः इतिमन्त्रेण दक्षिणाग्रां रेखाद्वयं कृत्वा, दर्भपिञ्जलीमुत्तरस्यां क्षिपेत् । ततो जलेन पिण्डिकासेचनम् । तदनु छिन्नमूलकुशान् पिण्डिकायां दद्यात् । ततः ७२

꙳ न्युब्ज—पवित्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सव्येन । ॐ देवताभ्य इति त्रिःपठेत् । अपसव्यं विधाय एकं पुटकं वामहस्ते कृत्वा; मोटकादिकमादाय । ॐ अद्यामुकगोत्र अस्मत्पितरमुकशर्मन्सपत्नीक वसुस्वरूपा-द्यकर्तव्य महालयापरपक्षान्तर्गतपार्वणश्राद्धे पिण्डस्थानेऽत्रावनेनिक्ष्व ते स्वधा, इति-
छिन्नमूलकुशोपरि अवनेजनंदद्यात् । एवमवनेजनं पितामहादिभ्यः, मातामहादिभ्य तथा अन्य पितृभ्यो दद्यात् । ततः पिण्डान्निर्माय मोटकादीनि प्रथमपिण्डंचादाय वामहस्तेन पुटकादिस्थजलमादाय ॐ अद्यामुकगोत्र अस्मत्पितरमुकशर्मन्सपत्नीक वसुस्वरूप अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एषः पिण्डोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतोस्तेस्वधा, इत्यवनेजनोपरि प्रत्येकं पिण्डं दद्यात् । ततः आस्तृत कुशमूलेन लेपभागभुजस्तृप्यन्तु इतिकरंप्रोक्ष्य । सव्यंकृत्वा, द्विराचम्य हरिं स्मरेत् । ततः सव्येनैवपुष्पादीन्यादायपित्रादीनुद्दिश्य, ॐ अत्रपितरोमादयध्वंयथा-भागमावृषायध्वम् इति उत्तराभिमुखोभूत्वा श्वासं नियम्य भास्करमूर्तीन्पित्रा-दीन्ध्यायन्, अपसव्यं कृत्वा, दक्षिणावर्तेन दक्षिणाभिमुखो भूत्वा, ॐ अमीम-दन्तपितरोयथाभागमावृषायिषत्, इतिमन्त्रेण पुष्पादिकानि पिण्डेषु क्षिपेत् । ततः प्रत्यवनेजपात्रं वामहस्ते कृत्वा, मोटकादिकमादाय, ॐ अद्यामुकगोत्रास्मत्पितर-मुकशर्मन्सपत्नीक वसुस्वरूप अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे—इदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिण्डप्रत्यवनेजनं ते स्वधा, इति पितृपिण्डे प्रत्यवनेजनं दद्यात्। एवं प्रत्येकं पिण्डेषु प्रत्यवनेजनं दद्यात्। ततो निवींविस्रंस्य, सव्यंकृत्वाऽचम्य हरिं स्मरेत्। अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय ॐ नमोवः पितरो रसाय नमोवः पितरः शोषाय नमोवः पितरो जीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय नमोवः पितरो मन्यवे नमोवः पितरः पितरो नमोवोगृहान्नः पितरो दत्तसतोवः पितरो द्वेष्मैतद्वः पितरो व्वासः—इति मन्त्रेण प्रत्येकं पिण्डोपरि सूत्रं दद्यात्। ततः क्रमेण प्रत्येकं पिण्डान् गन्धादिभिः सम्पूज्य धूप दीपौ च कारयेत्। मोटकादिकमादाय ॐ अद्यामुकगोत्राः—अस्मत्पितृपितामहप्रपितामहाः असुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्यकहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतानि पिण्डार्चनानि अत्रसूत्रगन्धाक्षतपुष्पधूपदीपनैवेद्यादिनि त्रैधाविभज्य युष्मभ्यं स्वधा, इतिपित्रादिभ्यो गन्धादिकमुत्सृजेत्, पुनरपि मोटकादिकमादाय ॐ अद्यामुकगोत्राः-अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः असुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्धे एतानि पिण्डार्चनानि अत्रसूत्रगन्धपुष्पाक्षतधूपदोपैक्षवादिनैवैद्यानि त्रेधाविभज्य युष्मभ्यं स्वधेति मातामहादिभ्यो गन्धादिकमुत्सृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जेत्! ततः सव्येन, विश्वेदेवब्राह्मणकरयोः, ॐ शिवाःआपः सन्तु इति जलम्। ॐ सौमनस्यमस्तु इति पुष्पम्। ॐ अक्षतंचारिष्टमस्तु इति यवान्प्रत्येकं दद्यात्। अपसव्येन, पितृब्राह्मणकरयोः, ॐ शिवाःआपः संत्वितिजलम्। ॐ सौमनस्यमस्त्वितिपुष्पम्। ॐ अक्षतंचारिष्टमस्त्वितितण्डुलान्प्रत्येकं दद्यात्। सव्येनाऽञ्जलिं बध्वा पूर्वाभिमुखोभूत्वेति पठेत्। ॐ अपांमध्ये स्थिता देवाः सर्वमप्सुप्रतिष्ठितम्। ब्राह्मणस्य करेन्यस्ता शिवाः आपो भवन्तु मे॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे॥ अक्षतं चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा। यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम॥ ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्। ॐ अस्मत्कुलेदीर्घमायुरस्तु, ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ यच्छ्रेयस्तदस्तु ॐ यत्पापं तत्प्रतिहतमस्तु इतिभूमौ, ॐ द्विपदेचतुष्पदेभ्यः शान्तिर्भवतु॥ ततोऽपसव्येन, पिण्डशेषान्नं पिण्डसमीपे विकिरेत्। वामहस्ते पुटकादिस्थं जलं गृहीत्वा मोटकादिकमादाय, ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः वसुस्वरूपस्य अद्यकर्तव्यमहालयापरपक्षान्तर्गतपार्वणश्राद्ध दत्तैतन्नपानादिकमक्षय्यमस्तु इति अक्षय्योदकं दद्यात्। एवं समस्त पिण्डेभ्यो अक्षय्योदकं दद्यात्। ततः सव्येन, कृताञ्जलिर्दक्षिणां दिशमवलोकयन्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अघोराः पितरः सन्तु इतिपिण्डोपरिपूर्वाग्रां जलधारां दद्यात् । सव्येनैव प्राङ्मुखोऽञ्जलिं बध्वा आशिषः प्रार्थयेत् । ॐ गोत्रन्नोवर्धताम्, ॐ वर्धतामिति प्रतिवचनम् ॐ दातारोनोभिवर्धन्ताम्, ॐ वर्धन्तामिति प्रतिवचनम् । ॐ वेदाः सन्ततिरेव च, ॐ सन्त्विति प्रतिवचनम् । श्रद्धा चनो मागात् ॐ मागादिति प्रतिवचनम् । ॐ बहुधेयञ्चनोऽस्तु, ॐ अस्त्विति प्रतिवचनम् । ॐ अन्नं चनो बहुभवेत्, ॐ भवत्विति प्रतिवचनम् ॐ अतिथींश्च लभेमहि, ॐ लभध्वमिति प्रतिवचनम् । ॐ याचितारश्चनः सन्तु, ॐ सन्त्विति प्रतिवचनम् । ॐ मायाचिष्मकंचन, ॐ मायाचेथाः इतिप्रतिवचनम् । ॐ एता आशिषः शत्याः सन्तु ॐ संत्विति प्रतिवचनम् ॥ ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात् । ॐ यं कामं कामयते सोऽस्मै कामः समृध्यतामिति मन्त्रेण । ततः अपसव्येन, सपवित्रान्कुशान्न्युब्जपात्रस्थितान् पिण्डोपरि निक्षिप्य । ॐ स्वधां वाचयिष्ये, ॐ वाच्यतामिति प्रतिवचनानन्तरं रिक्तबद्धाञ्जलिना ॐ अद्यामुकगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यस्तथामुकगोत्रेभ्योऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्योऽमुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः अद्यकर्तव्यमहालयपरपक्षान्तर्गत पार्वणश्राद्धे स्वधोच्यताम् ॐ अस्तु स्वधा इति प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MDF

वचनम् । ततः पयसादिसहितं पुटकं वामहस्ते कृत्वा, ॐ ऊर्ज्जंम्वहन्तीति मन्त्रेण सपवित्रकुशोपरिदक्षिणाग्रां पयोधारां दद्यात्, ॐ ऊर्जम्बहन्तीरमृतंघृतम्पयः कीलालम्परि श्रुतम् । स्वधास्थतर्पयतमेपितृन् ॥ ततः ॐ पिण्डाः संपन्ना इति ब्राह्मणं पृच्छेत्, ॐ सुसंपन्ना इति प्रतिवचनम् । ॐ पिण्डानुत्थापयामि, ॐ उत्थापयस्वेत्यनुज्ञातः सन्नम्रीभूय सव्येन, पिडानाघ्राय अपसव्येन, उत्थापयेत् । पिण्डाधारकुशांनुलमुकांश्च वह्नौ क्षिपेत् । सव्येन, पिण्डिकायां शङ्खं चक्रं च लिखेत्, ॐ शङ्खाय नमः ॐ चक्राय नमः इतियवैः शङ्खचक्रपूजां विधाय । अपसव्यं कृत्वा पिण्डमादाय उत्थाय ॐ गयायां पितृरूपेण स्वयमेव जनार्दन । तं दृष्ट्वा पुण्डरीकाक्षमुच्यते च ऋणत्रयात्, इतिमन्त्रेण पिण्डान् पिण्डिकोपरि निधाय पूजयेदेभिर्मन्त्रै ❀सव्येन, ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः । वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः । हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च । माससम्वत्सरेभ्यश्च दिवसेभ्यो नमो नमः । ततः सव्येनैव विश्वेदेवार्घपात्रं संचाल्य । अपसव्येन पित्रर्घपात्राण्युत्तानीकृत्य, सव्येन दक्षिणां दद्यात्, कुशयवजलदक्षिणाद्रव्याण्यादाय, ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाम-

❀ अत्र दम्पतिः पिण्डान्पूजयत इति—पूर्वजपरंपरागतः अस्माकं रूढो सम्प्रदायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पुरुरवोमाद्रवोनाम्नामद्यकृतै-तन्महालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसंबन्धिवैश्वदेविकश्राद्धप्रतिष्ठासिद्ध्यर्थं दक्षिणां हिरण्यमग्निदेवतं*तन्मूल्योपकल्पितंद्रव्यममुकदेवतममुकगोत्राय अमुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे—इति ब्राह्मणकरे उत्सृजेत्। पुनर्दक्षिणासहित-कुशादिकमादाय, ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम-मुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पुरूरवोमाद्रवोनाम्नामद्य-कृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धे श्राद्धसंबन्धिवैश्वदेविकश्राद्धप्रतिष्ठासिध्यर्थं दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं अमुकदेवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे, इति ब्राह्मणकरेउत्सृजेत्। कुशतिलजलदक्षिणाद्रव्याण्या-दाय; ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां कृतैतन्महालयापरपक्षान्तर्गतपार्वणश्राद्धपिण्ड-दानकर्मणः प्रतिष्ठासिध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योपकल्पितं द्रव्यमुकदेव-तममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे। पुनः कुशतिलजलदक्षिणा-द्रव्याण्यादाय ॐ अद्यामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम-

* हिरण्यं विश्वेभ्यो देवेभ्यः इति पारस्करः गृह्यसूत्रे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुकाऽमुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणां कृतैतन्महालयापरपक्षान्तर्गत- पार्वण श्राद्धे पिण्डदानकर्मणः प्रतिष्ठासिद्ध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्मूल्योप- कल्पितंद्रव्यममुकदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे इति ब्राह्मणकरे उत्सृजेत् । पुनः कुशतिलजलदक्षिणाद्रव्याण्यादाय ॐ अद्यामुकगोत्रा- णामस्मत्पितृपितामहःप्रपितामहानाममुकाऽमुकशर्मणां सपत्नीकानां वसुरुद्रादित्य- स्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुका- मुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यमहालयापरपक्षान्तर्गत- पार्वणश्राद्धे न्यूनातिरिक्तकर्मणः परिपूर्तये यद्देयमन्नपानादिकं द्रव्यं यथानामदैवतं नानानाम गोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य यथाकालेन दातुमहमुत्सृजे इति जले उत्सृजेत् । अपसव्येन । ॐ व्वाजेवाजेवतव्वाजिनोनोधनेषु व्विप्राऽअमृ- ताऽऋतज्ञाः ॥ अस्य मध्वः पिबत मादयद्ध्वंतृप्तायातपथिभिर्देवयानैः—इतिमन्त्रेण पित्रादीन् विसर्जयेत् । ततः सव्यं कृत्वा, ॐ पुरूरवोमाद्रवोनामानो विश्वेदेवाः प्रीयन्तामिति विश्वेदेवविसर्जनम् ॥ ततः ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः पठेत् । अद्यमे सफलं जन्म भवत्पादाब्जवन्दनात् ॥ अद्यमे वंशजाः सर्वे यातावोऽनुग्रहाद्दिवम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्रशाकादिदानेन क्लेशितायूयमादृशाः ॥ तत्क्लेशजातं चित्तात्तु विस्मृत्य क्षन्तुमर्हथ इति क्षमापनं प्रार्थयेत् । अपसव्येन. दीपाच्छादनं विधाय । सव्येन हस्तौ पादौ प्रक्षाल्य द्विराचम्य इति पठेत् । अस्मिन्पार्वणश्राद्धविधौ ॐ यत्कृतं तत् सुकृतमस्तु यन्नकृतं तद्विष्णोः प्रसादात् ब्राह्मणवचनाच्च सर्वं परिपूर्णमस्तु ॥१॥ अस्तुपरि-
पूर्णमिति प्रतिवदेत् । ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादितिश्रुतिः ॥२॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥ ३ ॥ ॐ कायेन वाचा मन- सेन्द्रियैर्वा बुध्यात्मना वा प्रकृतिस्वभावात् ॥ करोमि यद्यत्सकलं परस्मै नारायणा- येति समर्पयेतदितिमन्त्रेण कर्मपात्रस्थं कुशादिकं भूमावुत्सृजेत् ॥ ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं सम्पूर्णतां याति सद्योवन्देतमच्युतम् ॥ ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च । हूयतेच पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु, इति पठेत् ॥ ततः पुरोहितादयो ब्राह्मणाः गन्धाक्षतपुष्पाण्यादाय वक्ष्यमाणमन्त्रान्प टित्वागन्धादिभिर्यजमानस्य तिलकं कुर्युः ॥ वैदिक मन्त्राः ॥ ॐ शतमिन्नुशरदोऽ- अन्तिदेवायत्रानश्चक्राजरसन्तनूनाम् ॥ पुत्रासो यत्रपितरोभवन्तिमानोमध्यारीरिषता- युर्गन्तोः ॥ १ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माताासपितासपुत्रः ॥ विश्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoDF

देवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ २ ॥ स्वादुष ँ३ सदः पितरोव्वयोधाः कृच्छ्रेश्रितः शक्तीवन्तोगभीराः ॥ चित्रसेनाऽइषुबलाऽअमृद्धाः सतो वीराऽउरवोव्वातसाहाः ॥ ३ ॥ व्राह्मणासः पितरः सोम्यासः शिवेनोद्यावापृथिवीऽ-
अनेहसा ॥ पूषानः पातु दुरितादृतावृधोरक्षामाकिर्न्नोऽअघश ँ३ सऽईशत ॥४॥ पितृभ्य स्वाधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरः पितरः शुन्धध्वम् ॥२॥ पुनन्तुमा पितरः सोम्यासः पुनन्तुमा पितामहाः पुनन्तुप्प्रपितामहाः पवित्रेणशतायुषा ॥ पुनन्तुमा पितामहाः पुनन्तुप्प्रपितामहाः ॥ पवित्रेणशतायुषाव्विश्वमायुर्व्यश्श्नवै॥६॥ ततो यजमानोगृहीततिलको ब्राह्मणपादान्प्रक्षाल्य पादोदकंगृहीत्वातान्ब्राह्मणान्पायसादिभिर्भोजयित्वा तेभ्य लब्धाभ्यनुज्ञ सपरिवारः स्वयमपि भुञ्जीत ॥

इति पार्वणश्राद्धविधिः समाप्तः । शुभम्भूयात् ॥

पुस्तक पाउने ठेगाना पं० बालकृष्णाचार्य, यशोदा पुस्तकालय, दुर्गाघाट वाराणसी-१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ तीर्थश्राद्धविधिः ।

श्रीगणेशाय नमः ॥ अथतीर्थेतिकर्तव्यता ❀ पूर्वं तीर्थप्राप्तिकाल एव तीर्थं साष्टाङ्गं प्रणम्य नारिकेलफलपुष्पाक्षतादिकमादाय अमुकतीर्थाय नमः इति निवेद्य ॐकारेण तीर्थं स्पृष्ट्वा ॐ नमोस्तुदेवदेवायशितिकण्ठायदण्डिने ॥ रुद्रायचापहस्ताय चक्रिणे वेधसे नमः ॥ सरस्वती च सावित्री देवमाता गरीयसी ॥ सन्निधात्रीभवत्वत्र तीर्थे पापप्रणाशिनी ॥ तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ॥ भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि । इतिमन्त्रैः क्षेत्रपालं गणेशं च नमस्कृत्य सचैलं स्नायात् ॥ ततः विधिना यथोक्तेनस्नायात् । तत्र सङ्कल्पः ॐ तत्सत् इत्यादिदेशकालकीर्तनान्तेऽमुकशर्मणो मम बाल्यमारभ्याऽद्ययावज्ज्ञानताऽज्ञानतो वा कायवाङ्मनोभिराचरितानामस्पृश्यस्पर्शाऽभोज्यभोजनः— अपेयपानागम्यगमनसङ्करीकरणमलिनीकरणभ्रंशीकरणादिसमस्तपातकोपपातकातिपातकानां नितान्तोच्छेदनपूर्वकं शौचसंपत्तये अमुकतीर्थे स्नानमहं करिष्ये इतिस्नात्वा, प्रायश्चित्तार्थें गो भू हिरण्यादिकं दद्यात्, तत्रसंकल्पः ॐ अद्येत्यादिदेशकालकीर्तनान्तेऽमुकगोत्रस्यामुकशर्मणो मम

❀ आसनं पिण्डदानं च पुनः प्रत्यवनेजनम् । दक्षिणाचान्नसङ्कल्पं सर्वं तीर्थेस्वयंविधिरिति स्मृतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

❀ आसनं पिण्डदानं च पुनः प्रत्यवनेजनम् । दक्षिणा [illegible] तीर्थे विधिरिति स्मृतिः ।

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE

बाल्ययौवनवार्धकेषु ज्ञानतोऽज्ञानतो वा कायवाङ्मनोभिराचरितानां ब्रह्महनन सुरापान स्वर्णस्तेयगुरुतल्पगमन तत्संसर्गरूपाणां महापातकानां तथा गोवधव्रात्यतास्तेयनानिक्रियादि समस्तोपपातकानां जातिभ्रंशकरणसंकरीकरणापात्रीकरणादिरूपाणां चान्येषामतिपातकोपपातकानां निरसनपुरःसरं कायवाङ्मनः शुद्धये असुकतीर्थेऽमुकद्रव्यममुकदैवतममुकगोत्रायब्राह्मणाय तुभ्यमहंसंप्रददे, इति दत्वा क्षौरं कुर्यात् । तत्रमन्त्रः ॐ यानिकानि च पापानि ब्रह्महत्यासमानि च ॥ केशानाश्रित्य तिष्ठन्ति तस्मात् केशान् वपाम्यहम् ततः प्रथमं दक्षिणकर्णमारभ्य वामकर्णपर्यन्तमुदक्संस्थं ततःमृत्तिकयास्नायात् तत्र मंत्रः ॥ ॐ अश्वक्रान्तेरथक्रान्तेविष्णुक्रान्तेवसुन्धरे । मृत्तिके हर मे पापं यन्मयादुष्कृतङ्कृतम् ॥ मृत्तिकेब्रह्मणादत्ता काश्यपेनाभिमंत्रिता ॥ मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्य पा सुरे स्वाहा, इति ततः निमज्योन्मज्य जलादुत्तीर्य धौतेवाससी परिधाय भस्मादिनात्रिपुण्ड्रोर्ध्वपुण्ड्रादिकं धृत्वा सन्ध्यामुपास्य तर्पणं कुर्यात् । ततः संपादितैरुपकरणैस्तीर्थश्राद्धमारभेत् तत्राऽयं विधिः ॥ आचम्य, हरिं स्मृत्वा, स्वबामभागे गन्धादिना चतुष्कोणं मण्डलं विधाय तत्र शङ्खं चक्रं च विलिख्य तत्र कुशानास्तीर्य तदुपरिकर्मपात्रं स्थापयेत पात्रे च ॐ शन्नोदेवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति जलम्, पवित्रेस्थोव्वैष्णव्याविति पवित्रादिकम् यवोसीतियवान्, तिलोसि इति तिलान्, गन्धद्वारामिति गन्धम्, श्रीश्चते इति पुष्पाणि प्रक्षिप्य, ॐ कर्मपात्रं सम्पन्नमस्तु इति ब्राह्मणं पृच्छेत् अस्तुसंपन्नमिति प्रतिवचनम् । ततः तज्जलेन ॐ अपवित्रः पवित्रोवेतिमन्त्रेण श्राद्धीयवस्तून्यात्मानं च सिंचेत्, पुण्डरीकाक्षंस्मृत्वा तत्कुशादिकमादाय ॐ अद्येत्यादिदेशकालकीर्त्तनान्ते अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वरणप्रजापत्यग्निस्वरूपाणामक्षय्यतृप्तये धूरिलोचनसंज्ञक विश्वेदेवपूर्वकं पावर्णविधिनाऽमुकतीर्थे श्राद्धमहं करिष्ये, इति प्रतिज्ञाय, ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच ।। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः, इति त्रिः ।। सप्तव्याधादशार्णेषु मृगाः कालञ्जरेगिरी ।। चक्रवाकाः शरद्वीपे हंसा सरसि मानसे ।। तेपिजाताकुरुक्षेत्रे ब्राह्मणावेदपारगाः ।। प्रस्थितादीर्घमध्वानं यूयंकिमवसीदथ । श्राद्धारंभे गयां ध्यात्वा तथा देवं गदाधरम् ।। उभाभ्यां च नमस्कृत्य ततः श्राद्धं समाचरेत् । गया गयागयादित्योगायत्री च गदाधरः ।। गयागयासुरश्चैव षड्गयामुक्तिदायकाः ।। ईशानविष्णुकमलासनकार्तिकेयवह्नित्रयार्करजनीशगणेश्वराणम् ।। क्रौञ्चामरेन्द्रकलशोद्भवकश्यपानां पादान्नमामि सततंपितृमुक्तिहेतोः ।। ॐ गयायैनमः । ॐ गदाधराय नमः । ततः अपसव्येन दिग्बन्धनं कुर्यात्, तिलसहितमोटकमादाय तिलान्पूर्वादिक्रमेण विकिरेत् ॐ अग्निष्वात्ताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।। अपहता असुरा रक्षासिव्वेदिषदः । ॐ तथा वर्हिषदः पान्तु याम्यां ये पितरः स्थिताः ।। अपहता असुरा रक्षा सिव्वेदिषदः । ॐ प्रतीचीमाज्यपापितरस्तद्वत् । अपहता असुरा रक्षासिवेदिषदः । ॐ उदीचीमपिसोमपाः पितरः । अपहता असुरा रक्षा सिवेदिषदः । ॐ ऊर्ध्वतस्त्वर्यमा रक्षेत्कव्यवाडनलोप्यधः ।। रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।। सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे इति पुष्पसहितं मोटकं कट्यां धारयेदनेन मन्त्रेण, ॐ निहन्मि सर्वं यदमेध्यवद्भूवेद्धताश्च सर्वेऽसुरदानवा मया ।। रक्षांसि यक्षाः सपिशाचगुह्यका हतामया यातुधानाश्च सर्वे ।। ततः सतिलं कुशखण्डत्रयं गृहोत्वा, प्रयान्तु दूरतः सर्वे दैतेया दानवास्तथा ।। सर्वविघ्नोपशान्त्यर्थं क्षिपामि च कुशांस्तिलान्, इति मन्त्रेण दक्षिणस्यांक्षिपेत् । ततः सव्येन कुशादिकमादाय, ॐ अद्येहामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणां श्राद्धसंबन्धिनां धूरिलोचसंज्ञकानां विश्वेषांदेवानामिदमासनमस्तु इति कुशरूपमासनं दद्यात् । अपसव्येन मोटकमादाय, ॐ अद्येहामुकागोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणां तथा अमुकगोत्राणामस्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणामद्यकर्तव्यअमुकतीर्थश्राद्धे इदं मोटकरूपमासनं षोढाविभज्ययुष्मभ्यं स्वधा, इति मोटकरूपमासनं दद्यात् । ततः सव्येन ॐ अर्चयिष्ये इति पृष्ट्वा । ॐ अर्चयेति प्रत्युक्तः, गन्धपुष्पाक्षतधूपदीपनैवेद्यादिभिः संपूज्यकुशादिकमादाय ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुककशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणां श्राद्धसंबन्धिनो विश्वेदेवाः धूरिलोचननामानः एतान्यर्चनान्यत्रगंधपुष्पाक्षतधूपदीपनैवेद्ययज्ञोपवीतवासांसिवो नमः । ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु, इतिजलं दद्यात्, अस्तु परिपूर्णमिति प्रतिवचनम् । ततः अपसव्येन, ॐ अर्चयिष्ये, इति पितृब्राह्मणं पृष्ट्वा : ॐ अर्चयेति प्रत्युक्तः गन्धाधिभिः संपूज्य, मोटकादिकमादाय, ॐ अद्यामुकगोत्राः अस्मपितृपितामहप्रपितामहाः अमुकामुकशर्मणः सपत्नीकाः वरुणप्रजापत्यग्निस्वरूपाः तथा अमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः सपत्नीकाः वरुणप्रजापत्यग्निस्वरूपाः अद्यकर्तव्यअमुकतीर्थश्राद्धे एतान्यर्चनान्यत्रगन्धपुष्पाक्षतताम्बूलपूगील यज्ञोपवीतधूपदोपनैत्रेद्यादीनि षोढाविभज्य युष्मभ्यं स्वधा इत्युत्सृजेत् । ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु इति, जलं दद्यात्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

युष्मभ्य स्वधा इत्युत्सृजेत् । ॐ अर्चनविधो सर्वं परिपूर्णमस्तु इति, जलं दद्यात्,

CC-0. In Public Domain. Digitization by eGangotri. Funding: MDF

ॐ अस्तु परिपूर्णमिति प्रतिवचनम् । अथान्नसंकल्पः ॥ सव्येन, सोपस्करमन्नंप्रोक्ष्य कुशादिकमादाय ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुक-शर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणां श्राद्धसम्बन्धिभ्यो धूरिलोचनसंज्ञ-केभ्यो विश्वेभ्योदेवेभ्यः इदमन्नममृतस्वरूपेण संपद्यतो न मम स्वाहा ॥ अपसव्येन, मोटकादिकमादाय ॐ अद्याकमुगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः अमुका-मुकशर्मभ्यः सपत्नीकेभ्यः वरुणप्रजापत्यग्निस्वरूपेभ्यः तथा अमुकगोत्रेभ्यः अस्मन्मा-तामहप्रमातामहवृद्धप्रमातामहेभ्यः अमुकामुकशर्मभ्यः सपत्नीकेभ्यः वरुणप्रजापत्य-ग्निस्वरूपेभ्यः इदमन्नंसजलंसोपस्करममृतस्वरूपेण यथाभागं विभज्य वः स्वधा । ततः सव्येन । ॐ भवन्तः प्राशयन्तु इति विश्वेदेवब्राह्मणाय जलं दद्यात् । अप-सव्येन ॐ भवन्तः प्राशयन्तु इति पितृब्राह्मणाय जलं दद्यात् । सव्येन, गायत्रीं, मधुवाता इत्यृचः पितृसूक्तम्, अन्यद्वा विहितं गीतादि पारायणं पठेत् ॥ अपसव्येन । पिण्डदानार्थं वेदिकां निर्माय । ॐ ये रूपाणि इत्यङ्गारं भ्रामयित्वा, दक्षिणस्यां क्षिप्त्वा, दर्भपिञ्जल्या, ॐ अपहताइति दक्षिणाग्ररेखांकृत्वा, तामुत्तरतः क्षिप्त्वा, जलेन ॐ शन्नोदेवीरितिपिण्डिकामासिच्य, च्छिन्नमूलकुशानास्तीर्य । सव्येन ॐ देव-ताभ्यः इति त्रिः पठित्वा । अपसव्येन यवपिष्टमयान् पिण्डान्निर्माय, मोटकमादाय, ॐ अद्यामुक गोत्र अस्मत् पितः अमुकशर्मन् सपत्नीक वरुणस्वरूप अमुकतीर्थश्राद्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिण्डस्थाने अत्रावनेनिक्ष्व ते स्वधा, एवं पितामहादिः मातामहादि अन्य पितृभ्योऽपि पिण्डासनानि दत्वा, मोटकादिसहितं प्रथमपिण्डमादाय ॐ अद्येत्यादिपूर्वसंकल्पमुच्चार्यअमुकगोत्र अस्मत्पितः अमुकशर्मन् सपत्नीकवरुणस्वरूप*अमुकतीर्थश्राद्धे एषपिण्डोऽमृतस्वरूपोऽक्षय्यतृप्तिहेतोस्ते स्वधा; इतिपित्र्यं पिण्डं प्रदाय पितामहप्रपितामहादिभ्योऽपिदत्वा, मातामहादिभ्योऽन्येभ्यश्च यथाक्रमं दद्यात् ॥ पुनः एकं पिण्डमादाय, ॐ आब्राह्मणो ये पितृवंशजाता मातुस्तथावंशभवा मदीया ॥ कुलद्वये ये मम दासभूता भृत्यास्तथैवाश्रितसेवकाश्च ॥ मित्राणि सख्यः पशवश्चवृक्षाः पृष्ठश्चदष्टाश्चकृतोपकाराः ॥ जन्मान्तरे ये मम सङ्गताश्च तेभ्यः स्वधा पिण्डमिमं ददामि । इतिदत्वा, पुनरपरंपिण्डमादाय ॐ पितापितामहश्चैव तथैव प्रपितामहः ॥ मातापितामही चैव तथैव प्रपितामही ॥ मातामहस्तत्पिता च प्रमातामहतादयः ॥ तेभ्यः पिण्डोमयादत्तः अक्षय्यमुपतिष्ठताम् इतिदत्वा । मोटकमादाय ॐ अद्यामुकगोत्र अस्मत्पितः अमुकशर्मन् वरुण स्वरूप इदं पिण्डप्रत्यवनेजनन्ते स्वधा, इति दत्वाऽन्येभ्योपि पिण्डे प्रत्यवनेजनं जलं दत्वा लेपभागभुजस्तृप्यन्त्वितिकुशेन करं प्रोक्ष्य । सव्येन आचम्य, पुष्पादीन्यादाय उत्थाय ॐ अत्रपितरोमा-

* अन्वष्टकासु वृद्धौ च गयायां च क्षयेहनि । अत्र मातु पृथक् श्राद्धं अन्यत्र पतिना सह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoDH

दयध्वंयथाभागमावृषायद्ध्वम्, इति उत्तराभिमुखः श्वासं नियम्य भास्करमूर्त्तीम्–पित्रादीन्ध्यायन् ॐ अमीमदन्त पितरो यथा भागमावृषायिषत इति पठित्वा पिण्डेषु क्षिपेत् । नीवीं विस्रंस्य । सव्येन हरिं स्मरेत् । अपसव्येन सूत्राण्यादाय
ॐ नमोवः पितरोरसायनमोवः पितरः शोषायनमोवः पितरो जीवायनमोवः पितरः स्वधायैनमोवः पितरो घोरायनमोवः पितरो मन्यवेनमोवः पितरः पितरोनमोवो-गृहान्नः पितरोदत्तसतोवः पितरो द्वेष्मैतद्वः पितरोव्वास इतिमन्त्रेण प्रत्येकं सूत्रं दद्यात् । तत पिण्डान् संपूज्य, धूप दीप नैवेद्यादि निवेद्य मोटकादिकमादाय ॐ अद्यासुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः सपत्नाकाः वरुणप्रजापत्यग्निस्वरूपाः तथा अमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः सपत्नीकाः वरुणप्रजापत्यग्निस्वरूपाः एतानि पिण्डार्चनान्यत्र-गन्धपुष्पाक्षतधूपदीपनैवेद्योपायनद्रव्यादीनि यथाभागविभज्ययुष्मभ्यं स्वधा, इतिपिण्डे उसृजेत् । ततः आशिषः प्रार्थयेत् । सव्येन, ॐ गोत्रन्नो वर्धताम्, ॐ वर्धताम् इति प्रतिवचनम् । ॐ दातारोनोऽभिवर्धन्ताम्, ॐ वर्धताम् । ॐ वेदा वर्धन्ताम्, ॐ वर्धन्ताम् ॐ संततिर्वर्धताम्, ॐ वर्धताम् । ॐ श्रद्धाचनोमाव्यगमत्, ॐ मागात् । ॐ बहुदेयं च नोस्तु, ॐ अस्तु ॐ अन्नंचनो वहुभवेत्, ॐ भवतु । ॐ अतिथींश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लभेमहि, ॐ लभध्वम् ॐ याचितारश्चन: सन्तु, ॐ सन्तु। ॐ मायाचिष्म कंचन, ॐ मायाचेथा:। ॐ एता: आशिष: सत्या: सन्तु, ॐ सन्तु। ततोब्राह्मणहस्तेन तिलकं कारयेत्। ॐ यंकामं कामयते सोस्मैकाम: समृध्यतामिति। तत: अपसव्येन। ॐ स्वधांवाचयिष्ये, ॐ वाच्यताम्। रिक्ताञ्जलिना। ॐ अद्यामुकगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकशर्मभ्य: सपत्नीकेभ्य: वरुणप्रजावत्यग्निस्वरूपेभ्य: तथा अमुकगोत्रेभ्य: अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यऽमुकामुकशर्मभ्य: सपत्नीकेभ्य: वरुणप्रजापत्यग्निस्वरूपेभ्य: तथा अन्येभ्यश्च समस्त दत्तपिण्डेभ्य: अमुकतीर्थश्राद्धेस्वधोच्यताम्, ॐ अस्तु स्वधा। ॐ तत: सपयस्कंपुटकंवामहस्ते कृत्वा, ॐ उर्ज्जम्बहन्तीरमृतं घृतंपय: कीलालं परिश्रुतम्। स्वधास्थतर्पयत मे पितॄन्, इति दक्षिणाग्रां पयोधारांदत्वा, पृच्छेत्। ॐ पिण्डा: संपन्ना:। ॐ संपन्ना: ॐ पिण्डान्युत्थापयामि, ॐ उत्थापयस्व। तत: नम्रीभूय पिण्डान् सव्येनाघ्राय, अपसव्येनउत्थापयेत्। पिण्डाधार कुशानुल्मुकं च वह्नौ क्षिपेत्। तत: सव्येन। पिण्डिकायां शङ्कं चक्रं च विलिख्य, ॐ शंखाय नम:, ॐ चक्राय नम:, ॐ शंखचक्राभ्यां नम: इति यवै: शङ्खचक्रपूजां विधाय। पिण्डान् पिण्डिकोपरि निधाय, पूजयेदेभिर्मन्त्रै:। ॐ वसंताय नमस्तुभ्यं ग्रीष्माय च नमो नम:॥ वर्षाभ्यश्च शरत्संज्ञ ऋतवे च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

नमो नमः ॥ हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ॥ मासंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥ ततः कुशादि सहितं दक्षिणाद्रव्यमादाय । ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणाममुकश्राद्धप्रतिष्ठार्थं दक्षिणां यथानामदैवतं यथा नाम गोत्रायेत्यादिना विश्वेदेवब्राह्मणाय दद्यात् । पुनः कुशादिसहितं दक्षिणाद्रव्यमादाय । ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणाममुकतीर्थश्राद्धपिण्डदानप्रतिष्ठार्थमिदंरजतं यथानाम गोत्रायेत्यादि पठित्वा पितृब्राह्मणायदद्यात् ॥ पुनः भूयसीं दक्षिणामादाय । ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वरुणप्रजापत्यग्निस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नोकानां वरुणप्रजापत्यग्निस्वरूपाणामद्यकृतैतदमुकतार्थश्राद्धसांगतासिद्धये न्यूनातिरिक्तपूर्तये च अमुकद्रव्यममुकदैवतममुकामुक गोत्रेभ्योऽमुकामुक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नामशर्मभ्योब्राह्मणेभ्यो यथाभागंविभज्ययथाकालेन दातुमहमत्सृजे इति ब्राह्मणेभ्यो दद्यात् । धूरिलोचनविश्वेदेवाः प्रीयन्तामिति प्रणमेत् । अपसव्येन । वाजे वाजे इति मन्त्रेणपितॄन्विसर्जयेत् । सव्येन । ॐ देवताभ्यः इति त्रिः पठेत् । अपसव्येन दीपमाच्छाद्य । सव्येन हस्तौ पादौ प्रक्षाल्याचम्य इति पठेत् ॐ यत्कृतं तत्सुकृतमस्तु यन्नकृतं तद्विष्णोः प्रसादात् ब्राह्मणवचनासर्वंत्परिपूर्णमस्तु, ॐ अस्तु परिपूर्णम् इति ब्राह्मणः । ॐ प्रमादात् कुर्वतां कर्म० यस्यस्मृत्या० चतुर्भिश्च० कायेनवाचा० इति च पठेत् इति तीर्थश्राद्धविधिः समाप्तः । शुभं भवतु ॥

सबै प्रकार का पुस्तक पात्रा काशी का सामान मँगाउने ठेगाना —

पं० बालकृष्णाचार्य, यशोदापुस्तकालयः, दुर्गाघाट वाराणसी १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

※ अथैकपार्वणश्राद्धविधिः ※

एकोद्दिष्टश्राद्धवत् गौदानं देवर्षि दिव्यपितृस्वपितृतर्पणं विधाय एकापार्वणं कुर्यात् अत्र त्रयः पिण्डा एके विश्वेदेवाः आचम्य (१) प्राणानायम्य ॥ गोमयोपलिप्ते (२) प्राङ्गणे दीपं प्रज्वाल्य ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषायशाश्वते सहस्रकोटी युगधारिणे नमः ॥ कर्मसाक्षिणे दीपनारायणायनमः। इति दीपं संपूज्य (ॐ पवित्रेस्थो व्वैष्णाव्व्यौ' इति मन्त्रेण ब्राह्मण पवित्रे कृत्वा (३) तिल तैलेन संमर्दनपूर्वकं संस्नाप्य ॐ एतं ते देव

१—श्राद्धारंभेऽवसाने च पादशौचे तथार्चने।
विकिरे पिण्डदाने च षट्स्वाचमनमिष्यते। इतिमनुः

२—शुचिदेश विविक्तं तु गोमयेनोपलेपयेत्।
श्राद्धे दीपप्रदानेन तेजस्वी जायते नरः।
दीपहीने दहेच्छ्राद्धमन्धे तमसि मज्जति। इति ब्राह्मे।

३—निधाय वा दर्भवटूनासनेषु समाहितः।
प्रेषाऽनु प्रैषसंयुक्त सर्वं श्राद्धं प्रकल्पयेत् ॥ इति हेमाद्रौ सत्यव्रतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिन्तेन मामव । मनोजूतिर्जुं-
षतामाज्यस्य वृहस्पतिर्यज्ञमिमं तनोत्वरिष्टंयज्ञँ३समिमं दधातु । विश्वेदेवा सऽइह-
मादयन्तामो ॐ प्रतिष्ठ ॐ अस्यै प्राणाः प्रतिष्ठन्तु अस्यैप्राणाः क्षरन्तु च ।। इति
प्राणप्रतिष्ठां विधाय ।।) सव्येन ताम्बूलादिकं विप्रहस्ते दत्त्वा ।। पूर्वाभिमुखो भूत्वा
विश्वेदेवब्राह्मणस्य वामहस्तेन दक्षिणजानुं स्पृष्ट्वा स्वदक्षिणजानुं च पातयित्वा
अधोमुखेन स्वदक्षिणहस्तेन सताम्बूलादिकं उत्तानं विप्रकरं गृहीत्वा निमंत्रयेत् ।। ॐ
अद्येत्यादि अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नी-
कानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धीनां विश्वेषां देवानां पुरूरवोमाद्रवोनाम्ना
मद्यकर्तव्यसांत्सरिक एकपार्वणक्षयाहश्राद्धे एभिश्चन्दनपुष्पाक्षतपूगीफल यज्ञोपवीत-
वासोभिस्त्वं मया निमन्त्रितः । ॐ निमन्त्रितोस्मीतिप्रतिवचनम् ।। ततोऽपसव्यं
कृत्वा ।। ताम्बूलादिकं विप्रहस्ते दत्त्वा ।। दक्षिणाभिमुखो भूत्वा वामहस्तेन पितृ-
ब्राह्मणस्य वामजानुं च पातयित्वा अधोमुखेन स्वदक्षिणकरेणसतांबूलादिकं विप्रकरं
गृहीत्वा निमन्त्रयेत् ॐ अद्येत्यादि अमुकगोत्राणामस्मपितृपितामहप्रपितामहानाम-
मुकामुकशर्मणांसपत्नीकानां वसुरुद्रादित्यस्वरूपाणां अद्यकर्त्तव्यसांवत्सरिक एक-
पार्वणक्षयाहश्राद्धे एभिश्चन्दनपुष्पाक्षतपूगीफलयज्ञोपवीतवासोभिस्त्वंमयानिमं-
त्रितः ।। ॐ निमंत्रितोस्मि । इति प्रतिवचनम् । अक्रोधनैः शौचपरैः सततं ब्रह्मवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिभिः ।। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ।। सर्वायासविनिर्मुक्तैः

त्रितः ॥ ॐ निमंत्रितोस्मि । इति प्रतिवचनम् । अक्रोधनैः शौचपरैः सततं ब्रह्मचा-
CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDE

दिभिः ॥ भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ॥ भवितव्यं भवद्भिर्नोद्यतने श्राद्धकर्मणि ॥ ॐ भवितव्यं इति प्रतिवचनम् ॥ ततः सव्येन विश्वेदेवब्राह्मस्यचरणौ प्रक्षालयेत् । ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः ॥ १ ॥ इति मन्त्रेण ॥ ततः पाद्यपात्रंवामहस्ते कृत्वा ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्योरभिश्रवन्तुनः इति मन्त्रं पठित्वा । ॐ अद्येहामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्निकानां वसुरुद्रादित्यस्वरूपाणां श्राद्धसम्बन्धिनो विश्वेदेवाः पुरूरवोमाद्रवोनामानः एषपा-दार्घोंवः स्वाहा ॥ ततोऽपसव्येन पितृब्राह्मणस्य चरणौप्रक्षालयेत् ॥ ॐ नमोस्त्वन्ता-येत्यादिना ॥ यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठ पुष्करे ॥ तत्फलं पाण्डवश्रेष्ठ-विप्राणांपादशौचने ॥ विप्रपादोदकक्लिन्ना यावत्तिष्ठतिमेदिनी ॥ तावत्पुष्करपात्रेषु पिबन्तिपितरो जलम् ॥ इति पठित्वा पाद्यपात्रं वामहस्तेकृत्वा शन्नोदेवीरिति-मंत्रान्ते ॥ ॐ अद्येहामकगोत्रा अस्मत्पितृपितामहप्रपितामहा अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपा अद्यकर्त्तव्यसांवत्सरिकएकपार्वणक्षयाहश्राद्धे एषः-पादार्घस्त्रेधाविभज्ययुष्मभ्यं स्वधा इति ब्राह्मणनिमन्त्रणम् ॥ अथ ब्राह्मणपूजा ॥

ततः सव्येनाचम्य गृहंप्रवेशयेत् ॐ आगता यूयम् ॥ ॐ सुस्वागतावयम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ इदमासनम्, अस्ति, अत्रास्यताम् ॥ ॐ आस्यते इति प्रतिवचनम् ॐ भूर्भुवः स्वरितिमन्त्रेण विश्वेदेवब्राह्मणंपूर्वाभिमुखमुपवेशयेत् ॥ ततोऽपसव्येन । ॐ आगता-यूयम् ॥ ॐ सुस्वा गतावयम् । ॐ इदमासनमस्ति, ॐ अत्रास्यतामम् ॥ ॐ आस्यते-इति प्रतिवचनम् । ॐ भूर्भुवः स्वरितिमन्त्रेणमुदङ्मुखनुपवेशयेत् ॥ ततः सव्येन । ॐकर्मपात्रमहंकरिष्ये । इनि पृच्छेत् । कुरुष्वेत्यनुज्ञातः सन् ॥ कर्मपात्रा-र्थमष्टाङ्गुलाधिकव्यासं पात्रं पुरतो निधाय ॐ पवित्रे स्थो वैष्णव्यौ ॥ इति मन्त्रेण कर्मपात्रे कुशान् प्रक्षिप्य । ॐ शन्नो देवीरभिष्टयऽआपोभवन्तु पीतये । शंयो रभि-श्रवन्तुनः ॥ इतिजलेना पूर्यं ॐ यवोसि यवयास्मद् द्वषो यवयाराता ॥ इति यवान् ॐ गन्धद्वारान् दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ इति गन्धम् । ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रेपार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् इष्णन्निषाणामुम्मऽ इषाणा सर्वलोकं मऽइषाणा ॥ इति पुष्पं च प्रक्षिप्य यद्देवादेदहेडनमिति मन्त्रत्रयात्मकं कूष्मांण्डसूक्तं पठन् दर्भैरालोडयेत् ॐ यद्देवादेवहेडनं देवासश्चकृमाव्वयम् । अग्निर्मातस्मादेनसो विश्वान्सुञ्चस्व ३ हसः ॥ यदि दिवा यदिनक्तमेना ३ सिचकृमाव्वयम् ॥ व्वायुर्मातस्मादेनसो विश्वान्मुञ्चत्व ३ हसः ॥ यदि जाग्रद्यदि स्वप्नऽएना ३ सि चकृमाव्वयम् । सूर्य्यो-मातस्मादेनसोब्विश्वान्मुञ्चस्व ३ हसः ॥ इत्यालोड्य्यो अपसव्यं कृत्वा । ॐ कर्म- ९६

पात्रमहङ्करिष्ये इति पितृब्राह्मणं पृच्छेत् ॐ कुरुष्व । इत्यनुज्ञातः सन् पूर्वोक्तप्रका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मातस्मादेन[illegible] ३ [illegible] वा । ॐ कर्म-
CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF
पात्रमहङ्करिष्य इति पितृब्राह्मणं पृच्छेत् ॐ कुरुष्व । इत्यनुज्ञातः सन् पूर्वोक्तप्रका-
रेण कर्मपात्रं कुर्यात् । एवंप्रक्षेपस्थाने तिलान् ॐ तिलोऽसि सोमदेवत्यो गोसवो
देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् पृणा हि नः स्वाहा ॥ इति

तिलान् प्रक्षिपेत् । एतावानेव विशेषः अन्यत्सर्वं पूर्ववद्विधाय सव्येन कुशत्रयसहितं
कर्मपात्रोदकमादाय । ॐ अपवित्रः पवित्रोवा सर्वावस्थाङ्गतोऽपिवा । यः स्मरेत्पुण्ड-
रीकाक्षं सबाह्याभ्यान्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनातु । इत्युक्त्वा श्राद्धदेशेद्र-
व्याण्यात्मानं च सिञ्चेत् ॥ ततो प्रधानसंकल्पं कुर्यात् । ॐ तत्सत् ३ ॐ विष्णुः ३
ॐ पुराणपुरुषोत्तमाय नमः इत्यादिदेशकालौ संकीर्त्य अमुकगोत्राणामस्मत्पितृपिता-
महप्रपितामहानाममुकामुकशर्मणां ३ सपत्नीकनां वसुरुद्रादित्यस्वरूपाणां पुरूरवोमाद्रव-
नामविश्वेदेवपूर्वकाणामद्यकर्त्तव्यसांवत्सरिकएकापार्वणक्षयाहश्रांद्धमेभिर्द्रव्यैरहं करिष्ये॥
इतिप्रज्ञांकृत्वा ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायैस्व-
धायै नित्यमेव नमो नमः ॥ इति त्रिःपठित्वा (१) । शप्तव्याधा दशर्णेषु मृगाः
कालंलरेगिरौ ॥ चक्रवाकाः शरद्वीपे हंसाः सरसिमानसे ॥ तेपिजाताः कुरुक्षेत्रे
ब्राह्मणा वेदपारगाः । प्रस्थितादीर्घमध्वानंयूयंकिमवसोदथ । ये विप्रमुख्या कुरुजा-

(१) येमाद्री ब्रह्माण्डे = आदिमध्यावसानेषु त्रिरावृत्तं जपेद्बुधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ङ्गलेषु जातास्तथा दासकुले मृगाश्च । कालञ्जरे सप्त च चक्रवाका ये मानसे ते वयमत्र सिद्धाः ॥ श्राद्धारंभे गयां ध्यात्वा धात्वा देवं गदाधरम् ॥ ताभ्यांचैव नमस्कृत्य ततः श्राद्धं समारभेत् ॥ गया गयो गयादित्यो गायत्री च गदाधरः । गया गयासुरश्चैव षड्गया मुक्तिदायकाः । ईशानविष्णु-कमलासनकार्तिकेयवह्नित्रयार्करजनीशगणेश्वराणाम् । क्रोञ्चामरेन्द्रकलशोद्भवकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॐ गयायै नमः । ॐ गदाधराय नमः इति पठित्वा ततोऽअपसव्येन दिग्बन्धनं कुर्यात् ॥ तिलसहितमोटकमादाय तिलान्पूर्वादिक्रमेण वक्ष्माणगन्त्रैर्विकिरेत् । ॐ अग्निष्वाताः पितृगणाः प्राचींरक्षन्तु मे दिशम् ॥ ॐ अपहताः, असुरारक्षा ᳪ सिव्वेदिषदः । तथा वर्हिषदः पान्तुयाम्यांयेपितरः स्थिताः ॐ अपहताः, असुरारक्षा ᳪ सिव्वेदिषदः प्रतीचीमाज्यपास्तद्वत् अपहताः असुरारक्षा ᳪ सिवेदिषदः—उदीचोमपिसोमपाः । आपहताः असुरारक्षा ᳪ दिव्वेदिषदः ॐ रक्षोभूतपिणाचेभ्यस्तथै वासुदोषतः ॥ सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे । इति सर्वतो विकीर्य मोटकं वामकट्यां धारयेदनेन मन्त्रेण (१) ॐ निहन्मि सर्वं यदमेव्यवत् भवेत् हताश्च सर्वेऽसुरदानवा मया ॥ रक्षांसियक्षाः सपिशाच गुह्यका हता मया यातुधानाश्च

---

(१) नीवीकार्यादिभागप्तिर्वामकक्षी कर्णे सुद (इति वाक्ये ।

... क्षिपामि च कुशांस्तिलान् ॥ इति द्वारदेशे दक्षिणस्यां क्षिपेत् । ततः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सव्य ॥ पुनः कुशतिलानादाय ...

पशांत्यर्थं क्षिपामि च कुशांस्तिलान् ॥ इति द्वारदेशे दक्षिणस्यां क्षिपेत् । ततः सव्येन विष्णुस्मरणम् । ॐ नमो नमस्ते गोविन्द पुराण पुरुषोत्तम । इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वतो दिशः ॥ इति रक्षार्थं विष्णु स्मरणम् अथासनम् । कुशादीन्यादाय ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरुपाणां श्राद्धसंबन्धिनां विश्वेषां देवानां पुरूरवार्द्रवनाम्नामद्यकर्त्तव्यसांवत्सरिकएकापार्वणक्षयाहश्राद्धे इदं कौशमासनं वः स्वाहा । ततोऽपसव्यं कृत्वा मोटकमादाय । ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्यसांवत्सरिक एकापार्वणक्षयाहश्राद्धे इदं मोटकरूपमासनं त्रेधाविभज्य युष्मभ्यं स्वधा ॥ ततः सव्येनाञ्जलिं बध्वा विश्वान्देवानावाहयेत् । यवांश्चादाय ॥ ॐ अद्येहामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यस्वरूपाणां - श्राद्धसंबन्धिनोविश्वान्देवान्पुरूरवार्द्रवनाम्नः अद्यकर्त्तव्यसांवत्सरिकएकापार्वणक्षयाहश्राद्धे आवाहयिष्ये ॐआवाहय इत्यनुज्ञाते (१) ॐ विश्वेदेवाः इति ३मन्त्रंपठित्वा ।

---

(१) यवहस्तस्ततो विप्रान् विज्ञाप्यावाहनं प्रति । आवाहयेत्यनुज्ञातो विश्वेदेवाय इत्यचः । आवाहयेत्ततो देवानागच्छन्त्विवति संपठन् ॥ इति यमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ॥ ये यत्र विहिताः श्राद्धे सावधाना भवन्तु मे ॥ इति पठन्नावाहयेत् ॥ ततोऽपसव्येनाऽञ्जलिबध्वा पितृनावाहयेत् ॥ ॐ अद्येहामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानमुकामुकशर्मणः सपत्निकान्व-सुरुद्रादित्यस्वरूपानद्यकर्त्तव्यसांवत्सरिक एकापार्वणक्षयाहश्राद्धे आवाहयिष्ये ॐ आवाहय इत्यनुज्ञाते उशन्तस्त्वेतिमन्त्रेणावाह्य ॥ ॐ अपहताऽअसुरा रक्षा ँसि वेदिषदः ॥ इति मन्त्रेणतिलान्विकीर्य । ॐ आयन्तुन इति मन्त्रं पठेत् (पृ० ३३ पं० २) सव्येनविश्वेदेवब्राह्मणम्पृछेत् । ॐ हस्तार्घं पात्रमहं करिष्ये । ॐ कुरुष्व इत्यनुज्ञातः सन् । पुटकमेकमग्रेकृत्वा ॐ पवित्रेस्थ (पृ० ६० पं० १२) इति मंत्रेण पवित्रे पूर्वाग्रेस्थापयेत् । शन्नोदेवीरिति (पृ० ६१ पं० ४) जलं । ॐ यवोसीति (पृ० ६१ पं० ६) यवान् । श्री श्चते (पृ० ६१ पं० ९) तिपुष्पे गंधद्वारामिति (पृ० ६२ पं० ४) गन्धं प्रक्षिप्य । ॐ हस्तार्घ पात्रं संपन्नम्—इति पृच्छेत् । सुसंपन्नंमित्युक्ते । हस्तार्घपात्रमुत्थापयामि (१) ॐ उत्थापयस्व इत्यनुज्ञातः सन् हस्तार्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं गृहित्वा ॐ नमो-नारायणायेति मन्त्रेण विप्रकरे पुष्पसहितं पूर्वाग्रं पवित्रं धृत्त्वा दक्षिणकरेण पुटक-

(१) ततोऽर्घपात्रसम्पत्ति वाचयित्वाद्विजोत्तमान् दत्वाहस्ते पवित्रं च कृत्वा पूजां च पादतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

(१) तते[illegible] पूजां च पादतः ।

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE-IKS

यादिव्या इति मन्त्रेण [illegible] पयसा संबभूवुर्याऽअन्तरिक्षाऽउतपार्थिवीर्याः ॥
हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः स३ँ स्योनासुहवाभवन्तु ॥ इति मन्त्रेणार्घ-पात्रस्थं जलमभिमंत्र्य ॥ कुशयवजलान्यादाय ॐ अद्येहामुकगोत्राणामस्मत्पितृपिता-महप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां श्राद्ध-संबन्धिनो विश्वेदेवाः पुरूरवार्द्रवनामान अद्यकर्त्तव्ये सांवत्सरिकएकापार्वणक्षयाह-श्राद्धे एषहस्तार्घोवः स्वाहा ॥ इति ब्राह्मणकरेऽर्घ्यं दद्यात् । अर्घे पुनः प्रत्यर्घं अस्तु इति विप्रकरस्थं सपुष्पं पवित्रमर्घपात्रे धृत्वा तदर्घपात्रं भूमौ धृत्वा अर्घपात्रस्थ-जलेन तच्चक्षुरितिचक्षुः स्पर्शः कार्यः ततो विश्वेभ्योदेवेभ्यः स्थानमसीति उत्तानं स्थापयेत् ॥ ततोऽपसव्येन ॐ हस्तार्घपात्राण्यहंकरिष्ये इति ब्राह्मणं पृच्छेत् ॥ ॐ कुरुष्वेत्युक्ते पित्रादित्रिभ्यः स्वाग्रेपुटकत्रयमासाद्य तेषु ॐ पवित्रेस्थ इति उत्तरा-ग्राणि पवित्राणि धृत्वा ॐ शन्नोदेवीरिति जलं ॐ तिलोसीति तिलान् गन्धद्वारा-मिति गन्धम् श्रीश्चतेति पुष्पं प्रक्षिप्य । ततः ॐ हस्तार्घपात्राणि संपन्नानि इति पितृब्राह्मणं पृच्छेत् । ॐ सुसंपन्नमितिप्रत्युक्ते ॐ हस्तार्घपात्राण्युत्थापयामि इति पितृब्राह्मणं पृच्छेत् ॐ उत्थापयस्वेति प्रत्युक्ते प्रथमंपित्रार्घपात्रं वामहस्ते धृत्वा ॐ नमोनारायणायेति विप्रकरे उत्तराग्रं पवित्रं धृत्वा दक्षिणकरेण हस्तार्घपात्रमुखं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिधाय । ॐ यादिव्येतितज्जलमभिमंत्र्य तिलजलमोटकमादाय । ॐ अद्येहामुक-गोत्रास्मत्पितरमुकशर्मन् सपत्नोकवसुस्वरूपाद्यकर्तव्यसांवत्सरिकएकापार्वणक्षयाह-श्राद्धेएषहस्तार्घस्ते स्वधेति ब्राह्मणकरेऽर्घं दद्यात् । अर्घेपुनःप्रत्यर्घमस्तु इति ब्राह्मण-करस्थं पवित्रमर्घमात्रे निधाय तं भूमौ स्थापयेत् । एवं पितामह प्रपितामहाभ्यामपि दत्त्वा । ततः प्रपितामहार्घपात्रेकृत्वा तदुभयं पित्रर्घपात्रे कृत्वा पुनः पित्रर्घपात्रे कृत्वा तदुभयं प्रपितामहार्घपात्रोपरि धृत्वा सव्यं कृत्वा तत्रस्थ जलेन । ॐ तच्च (६३ पृ० पं० ७) क्षुरितिचक्षुः स्पर्शः । ततोऽपसव्येन पितृद्विजस्यवामभागे ॐ पितृभ्यःस्थानमसीतिन्युब्जं कुर्यात् तदुपरिकुत्रयंदद्यात् । दर्भत्यागः । (४) सव्येन ॐ अर्चयिष्ये, इतिविश्वेदेवब्राह्मणंपृच्छेत् ॥ ॐ अर्चय इत्युक्ते । अत्र (५) गन्ध-पुष्पाक्षतधूपदीपद्रव्य (६) ताम्बूल यज्ञोपवीत वस्त्रादिभिरभ्यर्च्य (७) ब्राह्मणाय-तिलकं दत्वा धूपदीपौचकारयेत् ततः कुशादिकमादाय ॐ अद्येहामुकगोत्राणाम-

(१) आयुः स्कामस्य नेत्रसेचनमितिस्कान्दे । (२) संश्रावांश्च तत सर्वान् पात्रे कुर्यात्समाहितः । पितृभ्यः स्थानमसीति न्युब्जं पात्रं निधापयेदितिकौर्मे । तस्योपरि कुशान्दत्वेतिवैजवापः ।

(४) श्राद्धारम्भे तु ये दर्भाः पादशौचे विवर्जयेत् । अर्चनादौ तु ये दर्भा पिण्डोत्थाने विवर्जयेत् । उत्थानान्ते तु ये दर्भा दक्षिणान्ते विसर्जयेत् । प्रार्थनादौ तु ये दर्भा नमस्कारे विसर्जयेत् । इति स्मृत्यन्तरे ।

(५) अत्र नाम जलम् । (६) ब्राह्मणपूजायां नैवेद्याभावः प्रमाणमाकरे द्रष्टव्यम् । (७) धूपदीपाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

स्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानांवसुरुद्रादित्यस्वरूपाणां श्राद्धसंबन्धिनो विश्वेदेवाः पुरूरवार्द्रवनामान एतान्यर्चनानि अत्रगन्धपुष्पाक्षत-धूपदीपताम्बूलयज्ञोपवीतोपायनवासांसि वः स्वाहा ॥ इत्युत्सृजेत् ततोऽपसव्येनपितृ- १०३
ब्राह्मणं पृच्छेत् ॐ अर्चयिष्ये । ॐ अर्चयेत्युक्तेसति गन्धादिभिरभ्यर्च्य ब्राह्मणा-यतिलकंदत्वा धूपदीपौचकारयेत् मोटकादिकमादाय ॐ अद्येहामुकगोत्रा अस्मत्पितृ-पितामहप्रपितामहा अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः एतान्यर्च-नानि अत्र गन्धपुष्पाक्षतधूपदीपताम्बूलयज्ञोपवीतोपायनबासांसित्रेधाविभज्य युष्मभ्यं स्वधा ॥ इति उत्सृजेत् । सव्येन विश्वेदेव ब्राह्मणहस्ते ॐ अर्चनविधेः सर्व परि-पूर्णमस्तु इति जलं दद्यात्–अस्त्वित्युक्ते सति सव्येनैव विश्वेदेवब्राह्मणभोजनस्थाने चतुर्दिक्षु । यथा चक्रायुधो विष्णु स्त्रैलोक्यं परिरक्षति ॥ एवं मण्डल भस्मैतत्सर्व-भूतानि रक्षतु । इति मन्त्रेण भस्मनाजलेन नीवारचूर्णेन वा आसनसहितं चतुष्कोणं मण्डलं विधाय अपसव्येन पितृब्राह्मणहस्ते ॐ अर्चनविधेः सर्वं परिपूर्णमस्तु । इति जलंदद्यात् ॥ ॐअस्तु इतिप्रतिवचनं ॥ पितृब्राह्मणभोजनस्थानेचतुर्दिक्षुआसन-सहितंचतुष्कोणं मण्डलं पूर्वोक्तमन्त्रेण कुर्यात् इति ब्राह्मणपूजनम् ॥

(१) अथाऽसव्ये३नेवाग्नौकरणं ॥ दक्षिणाभिमुखो भूत्वा वामजान्वाच्य पुटकादौ-

(१) छन्दोगा जुहुयुः सव्येनापसव्येन याजुषाः । इति वृद्धयाज्ञवल्क्यः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सघृतमन्नंकृत्वा ।। ॐ अग्नौकरणमहंकरिष्ये इतिपितृब्राह्मणं पृच्छेत् ॐ कुरुष्व ।। इत्युनुज्ञातः पितृब्राह्मणकरेजलपात्रेवाजुहुयात् ।। ॐ अग्नयेकव्यवाहनायस्वाहा । इदमग्नयेकव्यवाहनाय ।। इति त्यागः ।। ॐ सोमाय पितृमते स्वाहा इदं सोमाय-पितृमते । हुतशेषमन्नं पितृब्रह्मणभोजनपात्रे प्रक्षिपेत् ।

अथभूस्वामि (१) ।। तिलघृतमधुजलयुतमन्नं मोटकादिसहितमादाय ।। दणिणाभिमुखोभूत्वा ।। ॐ इदं अन्नं सजलं एतत्भूस्वामि पितृभ्यो नमः इत्युत्सृजेत् ।।

अन्नसङ्कल्पः

अथान्नसंकल्पः ।। ततः सव्यंकृत्वा विश्वान्देवान्ध्यायन्सोपस्करं यवजलयुतम-न्नमुपनीय मधुनाभिघार्य ऋजुहस्तभ्यामन्नपात्रमालभ्य वामकरोपरि दक्षिणकरं कृत्वा जपति ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतं जुहोमि स्वाहा ।। ॐ इदंविष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पा ᳪ सुरे ।। इति ॐ विष्णोः कव्य ᳪ रक्ष । इति वैष्णव्यर्चा वा । ततः इदमन्नं ।। इमां आपः ।।

(१) क्षेत्रपालमसंपूज्य यत्कर्मकुरुते क्वचित । तस्य कर्मफलं हन्ति क्षेत्रपालो न संशयः इति प्रयोगसारे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

(१) क्षेत्रपालमसंपूज्य यत्कर्मकुरुते क्वचित । तस्य कर्मफलं हन्ति क्षेत्रपालो न संशयः इति प्रयोगसारे ।

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

ॐ इदमाज्यं ॥ ॐ इदंहविरित्यन्ने एतान्युपकरणानि इति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्यॐयवोसीति मन्त्रेण यवान् अन्नोपरितोविकीर्य ॥ कुशयव-जलान्यादाय ॥ वामहस्तांगुल्यंगुष्ठैः क्रमेणान्नमपश्च स्पृष्ट्वा ॥ ॐ अद्येहामुकगो-त्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानांवसुरुद्रादित्यस्व-रुपाणां श्राद्धसंबन्धिभ्यो विश्वेभ्योदेवेभ्यः पुरूरवार्द्रवनामभ्यः इदमन्नंसजलं सोपस्करंपरिविष्टं परिवेव्यमाणं चाक्षयतृप्तिहेतोर्वः स्वाहेति ब्राह्मणकरे कुशादिक-मुत्सृजेत् ॥ ततोऽपसव्येन ॥ सोपस्करंतिलजलयुतमन्नमुपनीय मधुनाभिघार्य अधो-मुखाभ्यांव्यस्ताभ्यांपाणिभ्यामन्नपात्रमालभ्य दक्षिणहस्तोपरि वामहस्तं कृत्वा जपति ॥ ॐ पृथिवीतेत्यादि जुहोमीत्यन्तं ॥ ॐ इदंविष्णुरित्यादिसुरेत्यन्तम् ॥ ॐ विष्णोः कव्य ꣳ रक्ष इतिच वा ॐ इदमन्नं ॥ ॐ इमाआपः ॐ इदमाज्यं ॥ इदंहविरित्यन्ने एतान्युपकरणानि इतिक्रमेणान्नजजघृतेषु ॥ विप्रदक्षिणांगुष्ठं निवेश्य । ॐ अपहता असुरारक्षा ꣳ सि व्वेदिषदः इत्यन्नंपरितस्तिलान्विकीर्य (१) मोटकादीन्यादाय ॥ वामहस्ताङ्गुष्ठांगुलिभिः क्रमेणान्नमपश्चस्पृष्ट्वा ॐ अद्येहामुक-गोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्यो ऽमुकामुक शर्मभ्यःसपत्नीकेभ्यो वसुरुद्रा-

(१) सर्वदा च तिलाग्राह्या पितृकृत्ये विशेषतः भोज्यपात्रे तिलान्दृष्ट्वा निराशाः पितरोगताः इति पृथ्वीचन्द्रोदये पराशरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दित्यस्वरूपेभ्य इदमन्नं सजलं सोपस्करं स परिविष्टं परिवेष्यमाणं चाक्षय्यतृप्तिहे- तोस्त्रेधाविभज्य युष्मभ्यं स्वधेति ब्राह्मणकरे मोटकादिकमुत्सृजेत् ॥ ततः सव्येन देवब्राह्मणकरेषु । ॐ भवन्तः प्राशयन्तु इत्यपोशनन्दत्वा ॥ अपसव्येन पितृब्राह्मण- करेषु च दत्वा सव्येन श्राद्धकर्ताकुशोपरिविशन् ॥ ॐ मधुवातेतित्यृचं पठेत् ॥ ॐ मधु ३ ॥ अन्नहीनं क्रीयाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॐ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठेत् ॥ यथासुखं जुषध्वमिति वचनानन्तर ते ब्राह्मणा मौनिनो भूत्वा भुञ्जीरन् हस्तसंज्ञया च भक्षं प्रार्थयेयुः ॥ ततः सव्याहृतिकां गायत्रीं जपित्वा मधुवातेति ऋचश्च पठित्वा ॥ पितृ सूक्तं च पठेत् ॥ ब्राह्मणाय यत्रयत्रेच्छोपलभ्यते तत्तदात्मकं यच्छन् मन्दंमन्दं भोजयेत् ॥

ततः पितामहान्नपात्रसन्निधौ ॥ (१) आस्तृतदक्षिणाग्रकुशत्रयायां भूमौ विकिराशनं ॥ अपसव्येन मोटकादीन्यादाय विकिरा शनन्दद्यात् ॥ असंस्कृतप्रमी- तानां त्यागितां कुलयोषिताम् ॥ उच्छिष्टभागधेयानां दर्भेषु विकिराशनम् ॥ इति आस्तृतकुशोपरि कुशतिलोदकमाषिच्य ॥ (१) विकिरं मोटकञ्चादाय ॥ अग्नि-

(१) पार्वणेनैऋतौज्ञेयं क्षयेचाग्नेय एव च । नान्दी पूर्वे तथा ज्ञेयं प्रेतश्राद्धे तु दक्षिणे । इति भवदेवः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दग्धाश्चये जीवा येप्यदग्धाःकुले मम ॥ भूमौदत्तेन तृप्यन्तु तृप्तायान्तु परांगतिम् इतिमन्त्रेणास्तृतकुशोपरि तदन्नं विकिरेत् ततः कुशान्परित्यज्य हस्तौ पादौ प्रक्षाल्य सव्येन द्विराचम्य गायत्रों जपित्वा मधुव्वातेति ऋचांपाठः ततोब्राह्मणा-
न्तृप्तान्ज्ञात्वा ॐ जलगण्डूषमिदन्ते इति विश्वेदेवब्राह्मणाय प्रत्यपोशनन्दद्यात् । अपसव्येन ॥ ॐ जलगण्डूषमिदन्ते इति पितृब्राह्मणाय प्रत्यपोशनन्दद्यात् सव्येना- ञ्जलिबध्वा विश्वेदेवब्राह्मणं प्रतिप्रश्नः ॐ तृप्ताःस्थ इति । ॐ तृप्ताःस्मः इति प्रतिवचनम् ॐ पिण्डदानमहंकरिष्ये इत्युभयत्रपृच्छेत् ॐ कुरुष्वेति प्रतिवचनम् । ततः पिण्डदानार्थं हस्तमितां चतुरंगुलोच्छ्रितां सैकतादिकीं दक्षिणप्लवां पिण्डिकां निर्माय तदुपरि (१) आदौरेखाकरणं पश्चादङ्गार भ्रामणम् ।

ॐ येरूपाणित्यङ्गारं भ्रामयित्वा दक्षिणस्यां क्षिपेत् ततः पिण्डिकामधोवामेन- पाणिनादर्भपिञ्जुलीं (२) गृहीत्वा दक्षिणहस्ते कृत्वा सव्योपगृहीत दक्षिणपाणिना ॐ अपहता असुरारक्षा ॐ सिव्वेदिषदः इति मन्त्रेणाग्ररेखांकृत्वा दर्भपिजुलीमुत्त- रस्यां क्षिपेत् ततोजलेन शन्नोदेवी इति मन्त्रेण पिण्डिकासेचनं तदनुछिन्नमूल- कुशान्पिण्डिकायां दद्यात् ततः सव्येन देवताभ्य इति त्रिः पठेत् अपसव्यं कृत्वा एकंपुटकं वामहस्ते कृत्वा मोटकमादाय ॐ अद्येहामुकगोत्रास्मत्पितरमुकशर्मन्वसुस्व- रूप अद्य कर्तव्ये एकपार्वणक्षयाहश्राद्धे पिण्डस्थाने अवनेनिक्ष्व ते स्वधेति छिन्नमूल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुशोपरि अवनेजनं दद्यात् । एवं पितामहप्रपितामहाभ्यां दद्यात् ततः पिण्डान्निर्माय प्रथमपिण्डञ्चादाय वामहस्तेनपुटकादिस्थजलमादाय ॐ अद्येहामुकगोत्रास्मत्पितर-मुकशर्मन्वसुस्वरूप अद्य कर्तव्ये एकपार्वणक्षयाहश्राद्धे एषपिण्डोऽमृतस्वरूपोऽक्षय-तृप्तिहेतोस्तेस्वधा इति अवनेजनोपरिपिण्डंदद्यात् । एवं पितामहप्रपितामहाभ्यांदद्यात् तत आस्तृतकुशमूलेन ॐ लेपभागभुजस्तृप्यन्तु लेपभागंदत्त्वा । ततःकरं प्रोक्ष्य दर्भत्यागः ॥ सव्यं कृत्वा द्विराचम्य हरिस्मरेत् ॥ ततः सव्येनैव पुष्पादीन्यादाय पित्रादीनुद्दिश्य ॥` उत्थाय ॐ अत्र पितरोमादयध्वं यथाभागमावृषापध्वमिति उत्तराभिमुखो भूत्वा पठेत् श्वासं नियम्य भास्वरमूर्त्तिन्पित्रादीन्ध्यायन् अपसव्यं कृत्वा दक्षिणावर्तेन दक्षिणाभिमुखोभूत्वा ॐ अमीमदन्त पितरो यथाभागमावृषायिषत इतिमंत्रेण पुष्पादिकानि पिण्डेषु निक्षिपेत् । ततो अवनेजनपात्रं वामहस्तेकृत्वा मोटक-मादाय । ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मंन् अद्य एकपार्वणक्षयाहश्राद्धे इदं पिण्डप्रत्यवनेजनं ते स्वधा । एवं पञ्चपिण्डेषुप्रत्यवनेजनं दद्यात् । ततो नीवीं विस्रंस्य सव्यं कृत्वाचम्य हरिं स्मरेत् अपसव्यंकृत्वा ॥ पितृभ्यः षडञ्जलीकरणम् । ॐ नमोवः पितरो रसाय नमोवः पिनरो जीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय नमोवः पितरोमन्न्यवे नमोवः पितरः पितरो नमोवोगृहान्नः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितरो दत्तसतो वः पितरोदेष्ष्मै इतिपितृन्नमस्कृत्य (१) वामेनपाणिनाधृतंसूत्रं दक्षिणेनादाय । ॐ एतद्वः पितरोव्वासआधत्त ।। इति मन्त्रंपठित्वा प्रत्येकं पिण्डोपरि सूत्रं दद्यात् ।। ततः क्रमेण पिण्डान् गन्धादिभिः संपूज्य धूपदीपौ च कारयेत् मोटकमादाय ॐ अद्येहामुकगोत्रा अस्मत्पितृवितामहप्रपितामहाः अमुकामुकशर्माणः सपत्नीकाः–वसुरुद्रादित्यस्वरूपाः–अद्यकर्तव्येएकापार्वणक्षयाहश्राद्धे एतानिपिण्डार्चनानि अत्रसूत्रगंधपुष्पधूपदीपैक्षवादिनैवेद्यानि त्रेधा विभज्य युष्मभ्यं स्वधा इति गन्धादिकं उत्सृजेत् ।। ततः सव्येन विश्वेदेव ब्राह्मणकरयोः ॐ शिवा आपः सन्तु । इति जलम् ।। ॐ सौमनस्यमस्तु । इति पुष्पं ।। ॐ अक्षतं चारिष्टमस्तु । इति तण्डुलान् प्रत्येकं दद्यात् ।। अपसव्येन पितृब्राह्मणकरयोः । ॐ शिवा आपः सन्तु इति जलं ।। ॐ सोमनस्यमस्तु ।। इति पुष्पं ॐ अक्षतं चारिष्टमस्तु ।। इति तण्डुलान् प्रत्येकं दद्यात् । सव्येन अपांमध्येस्थितादेवाः सर्वमप्सु प्रतिष्ठितम् ।। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ।। लक्ष्मींर्वसति पुष्पेषु । लक्ष्मीर्वसति पुष्करे ।। लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे ।। अक्षतं चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा ।। यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ।। ततः कर्म ३पोत्रोदकं कुशै-

(१) वाससः सूत्रदानेन नरकेषु विपच्यते । इति भविष्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृंहोत्वाप्रतिमंत्रंस्वशिरस्यभिषिञ्चेत् ॐ अस्मत्कुलेदीर्घमायुरस्तु ॐ शांतिरस्तु ॐ पुष्टिरस्तु ॐ वृद्धिरस्तु ॐ यच्छ्रेयस्तदस्तु ॥ यत्पापं तत्प्रतिहतमस्तु । इतिभूमौ द्विपदेचतुष्पदेभ्यः शान्तिर्भवतु॥ ततोऽपसव्येन ॥ पिण्डशेषान्नं पिण्डसमीपे विकिरेत्।
गंगाजलं वामहस्ते पुटकादौ गृहीत्वा ॥ मोटकमादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणःअत्रएकपार्वणक्षयाश्राहश्राद्धेदत्तैतदन्नपानादिकमक्षयमस्तुइति पिण्डेऽक्षयोदकं दद्यात् ॥ एवं द्वाभ्यां दद्यात् ॥ सव्येनैवकृताञ्जलिर्भूत्वा ॐ अघोराः पितरः सन्तु इति पृच्छेत् । ॐ सन्तु इत्युक्ते । (१) ॐ गोत्रन्नोवर्द्धताम् । ॐ वर्द्धतामितिप्रतिवचनम् ॥ ॐदातारोनोभिवर्द्धन्तां ॐवर्द्धन्तामितिप्रतिवचनम् ॥ॐवेदाःसन्ततिरेवच । ॐसन्तु इति प्रतिवचनम् ॥ ॐश्रद्धाचनोमाव्यगमत् । ॐ मागादितिप्रतिवचनम् ॥ ॐ बहुदेयंचनोस्तु । ॐ अस्त्वतिप्रतिवचनम् ॥ ॐ अन्नंचनोबहुभवेत् ॥ ॐ भवतु । ॐ अतिथिंश्चलभेसहि । ॐलभध्वमिति प्रतिवचनम् । ॐयाचितारश्च नः सन्तु ॥ ॐ सन्त्वितिप्रतिवचनम् ॥ ॐ मायाचिष्मकंचन । ॐ मायाचेथाः । इति प्रतिवचनम् ॥ ॐ एताः सत्यासिषः सन्तु ॥ ॐ सन्तु ॥ ततः ॥ श्राद्धकर्त्तृब्राह्मणहस्तेनतिलकं

(१) दक्षिणां दिशमवलोकयन अघोरा इति मन्त्रेण पूर्वाग्रां जलधारां दद्यादिति केश्चिदुक्तं तस्य मूलमन्वेषणीयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुर्यात् ॥ ॐ यंकामंकामयते सोस्मैकामः समृध्यनामितिमन्त्रेण ॥ ततोऽपसव्येन सपवित्रान्कुशान्न्युब्जपात्रात्समादाय पिण्डोपरिनिक्षिप्य ॐ स्वधांवाचयिष्ये ॥ इति पितृब्राह्मणं पृच्छेत् । ॐ वाच्यतामितिप्रतिवचनानन्तरंरिक्तांजलिना । ॐ अद्यामुकगोत्रेभ्यः . अस्मत्पितृपितामहप्रपितामहेभ्यः अमुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः अत्र एकपार्वणक्षयाहश्राद्धे ॐ स्वधोच्यताम् । ॐ अस्तु स्वधा ॥ इति प्रतिवचनम् ॥ ततः पयसादिसहितं पुटकं वामहस्ते कृत्वा । ॐ उर्ज्जंवहन्ति इति मन्त्रेण सपवित्रकुशोपरि दक्षिणाग्रां पयोधाराम् दद्यात् ॥ततः ॐपिण्डाःसंपन्नाः । इति ब्राह्मणं पृच्छेत् ॐसुसंपन्नाः इति प्रतिवचनम् ॥ ॐ पिंडान् उत्थापयामि । ॐउत्थापयस्व इत्यनुज्ञातःसन् नम्रीभूयपिंडान्आघ्राय (१) उत्थापयेत्॥पिंडाधारकुशानुल्मुकंच वह्नौ क्षिपेत् ॥ सव्येन ॥ पिंडिकायां शंखचक्रे लिखेत् । ॐ शंखाय नमः ॐ चक्राय नमः ॥ इति यनैः शंखचक्रपूजांविधाय ॥ अपसव्यंकृत्वा ॐ गयायां पितृरूपेण स्वयमेव जनार्दनः ॥ तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥ इतिमन्त्रेण पिंडान्पिण्डिकोपरिनिधाय एभिमन्त्रैः पूजयेत् । सव्येन ॥ ॐवसन्ताय नमस्तुभ्यं ग्रीष्माय च नमोः नमः ।वर्षाभ्यश्च शरत्संज्ञऋतवे च नमो नमः ॥ हेमन्ताय नमस्तुभ्यं नमस्ते

(१) अत्रैव वसन्तादि ऋतुपूजनं युक्तं अथवा वसंतादि पूजनान्तरम् आवानं युक्तं अन्ययोच्छिष्टे पूजनमनुचितमेवाहुः श्राद्धचिंतामणिकारादयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिशिराय च ।। माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ।। सव्येनैवविश्वेदेवार्घ-पात्रंसंचाल्य अपसव्येन पित्रर्घपात्राण्युत्तानीकृत्य सव्येन दक्षिणान् दद्यात् कुशयवजल-दक्षिणाद्रव्याण्यादाय। ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुक-शर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां कृतैतत् एकपार्वणसंबन्धिनां वैश्वदैविक-श्राद्धप्रतिष्ठासिध्यचर्थं दक्षिणां हिरण्यमग्निदैवतं तन्मूल्योपकल्पितं द्रव्यं वा अमुक-गोत्रायामुकशर्मणेब्राह्मणाय तुभ्यमहं संप्रददे । इति ब्राह्मणकरे उत्सृजेत् । सव्ये-नैवकुशतिलदक्षिणाद्रव्यमादाय । ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहा-नाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां कृतैतत् एकपार्वणक्षयाह-श्राद्धप्रतिष्ठासिद्धचर्थं दक्षिणां ताम्रखंडं आदित्यदैवतं यथानामगोत्राय यथानाम-शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति उत्सृजेत् । पुनर्जलतिलकुशमादाय ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां एकपार्वणक्षयाहश्राद्धप्रतिष्ठार्थंन्यूनातिरिक्तपरिपूर्णार्थं यद्देयमन्नपानादिकंद्रव्यं यथानामदैवतं नानानामगोत्रेभ्यो ब्राह्मणेभ्यः कन्याकुमारेभ्यो ब्राह्मणीभ्यश्च यथा भागंविभज्य यथाकालेन दातुमहमुत्सृजे ।। इति उत्सृजेत् ।। सव्येनैव वाजेवाजेइतिपित्रादीन्विसर्जयेत् ॥ ततः ॐ पुरूरवोमार्द्रनामानो विश्वेदेवाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सव्येनैव वाजेवा... विश्वेदेवाः

CC-0. In Public Domain. Digitization by eGangotri. Funding: MoE

प्रीयन्तामिति विश्वेदेवंविसर्जयेत् । ॐ आमावाजस्य इति पठन्सीमातंगच्छेत त्रीन्समुद्रान्समसृपत्स्वर्गानपांपतिवृषभऽइष्टकानाम् । पुरीषंवसानः सुकृतस्य लोके तत्रगच्छयत्रपूर्वेपरेताः । इति पवित्रग्रन्थिमोक्षणम् । ततो देवताभ्यः इति त्रिः पठेत् ॥ अपसव्येन दीपाच्छादनं ॥ सव्येन हस्तौपादौप्रक्षाल्याचम्य ॐ यत्कृतंतत्सुकृतमस्तु यन्नकृतंद्विष्णोः प्रसादाद्ब्राह्मणवचनात्सर्वंपरिपूर्णमस्तु ॥ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषु च ॥ स्मरणादेवतद्विष्णोः संपूर्णं स्यादितिश्रुतिः आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च प्रयच्छन्तु तथा राज्यं पितरः श्राद्धतर्पिताः ॥ एक-पार्वणक्षयाहश्राद्धविधिः समाप्तः ॥

॥ शुभमस्तु ॥

प्रकाशकः पं० बालकृष्णाचार्य यशोदापुस्तकालय, वाराणसी पो० नं० १

६-२
१२२८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रीकर्तृक पार्वण, एक पार्वण श्राद्धगर्दा र तर्पणगर्दा पहिले भर्तृत्रयी--भर्ता, श्वश्रू, प्रश्वशुर, तथा श्वश्रू प्रश्श्रू, प्रप्रश्वश्रू तथा पितृत्रयी--पिता, पितामह, प्रपितामह एवं मातामही, प्रपितामही औ मातामहत्रयी—मातामह, प्रमातामह, वृद्धप्रमाताह, और र मातामही, प्रमातामही, वृद्धप्रमातामही और ज्येष्ठ कनिष्ठ देवर जेठाजूहरू सपत्नीक ज्येष्ठ कनिष्ठ पितृव्यहरू ज्येष्ठ कनिष्ठ-मामाहरू ज्येष्ठ, कनिष्ठ दाजू भायीहरू सपत्नीक ससुत भनी दिनू ज्येष्ठकनिष्ठनन्द आमाजूहरू, ज्येष्ठ कनिष्ठ फुपुहरू ज्येष्ठकनिष्ठ आमा साना आमाहरू सवसापत्यासधवाभन्नूपर्छ अनि ... दिदी बैहीहरू सापत्यासताभनी दिनू त्यसपछि अरू बाको रहेक हरूलाई दिनू । एक पार्वणमा २ विश्वेदेवा २ पितृब्राह्मण पार्वणमा ३ विश्वेदेवा, ३ पितृ ब्राह्मणथाप्नू पर्छ । स्वास्नीम सलेगर्ने पार्वण एकपार्वणमा एतिकुरा ख्याल राख्नु पर्छ । ११४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सलेगर्नें पार्दा एकपाविणमा एतिकुरा ख्याल राखनु पर्छ ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२२८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

८.८ ([illegible]
९०. — (१ जै.म. | ८८ छ्या
२०.— ९ - ९स्व. | १९रा.ग्र.
२ — जै.म.वि.
३ — सद्भावना।
२.
२०५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu